M. T. B. COLLEGE, SURAT
Manuscripts Library
No. Ref. / Ser. 641
Title: Kiratarjuniyam

641

किरातार्जुनीयम्

:	Kiratarjuniyam	:	Title
:	: Bharavi.	:	Author
:	:	:	Editor
:	:	:	Year, Vols.
:	:	:	Publisher
641 :	:	:	Remarks

641

किरातार्जुनी

श्रीगणेशायनमः॥ ॥श्रीः॥ श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुंक्त वेदितुं। स वर्णिलिंगी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः॥१॥ कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः॥ न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छंति मृषा हितैषिणः॥२॥ द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः॥ स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे॥३॥ क्रियासु युक्तैर्नृप चारचक्षुषो न वंचनीयाः प्रभवोनुजीविभिः॥ अतोर्हसि क्षंतुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः॥४॥ स किंसखा साधु न शास्ति योधिपं हितान्न यः संशृणुते स किंप्रभुः॥ सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः॥५॥ निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जंतवः॥ तवानुभावोयमवेदि यन्मया निगूढ

तत्त्वं नयवर्त्म विद्विषां॥६॥ विशंकमानो भवतः पराभवं नृपासनस्थोपि वनाधिवासिनः॥ दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः॥७॥ तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसंपदा यशः॥ समुन्नयन्भूतिमनार्यसंगमाद्वरं विरोधोपि समं महात्मभिः॥८॥ कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना॥ विभज्य नक्तंदिवमस्ततंद्रिणा वितन्यते तेन नयेन पौरुषं॥९॥ सखीनिव प्रीतियुजोनुजीविनः समानमानान्सुहृदश्च बंधुभिः॥ स संततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बंधुतां॥१०॥ असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया॥ गुणानुरागादिव सख्यमीयिवान्न बाधतेस्य त्रिगणः परस्परं॥११॥ निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियां॥ प्रवर्तते तस्य विशेष

किरा० १

॥२॥

ऽऽलिनी गुणानुरोधेन विना न सत्क्रिया ॥१२॥ वसूनि वांछन्न वशी न मन्युना स्वधर्म
इत्येव निवृत्तकारणः ॥ गुरूपदिष्टेन रिपौ सुतेपि वा निहंति दंडं न स धर्मविप्लवं ॥१३॥
विधाय रक्षान्परितः परेतरा नशंकिताकारमुपैति शंकितः ॥ क्रियापवर्गेष्वनुजीवि
सात्कृताः कृतज्ञतामस्य वदंति संपदः ॥१४॥ अनारतं तेन पदेषु लंभिता विभज्य सम्
यग्विनियोगसत्क्रियाः ॥ फलंत्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थसंप
दः ॥१५॥ अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरं ॥ नयत्ययुग्म
छदगंधिरार्द्रतां भृशं नृपोपायनदंतिनां मदः ॥१६॥ सुखेन लभ्या दधतः कृषीवलै
रकृष्टपच्या इव सस्यसंपदः ॥ वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्च
कासति ॥१७॥ उदारकीर्तेरुदयं दयावतः प्रशांतबाधं दिशतोभिरक्षया ॥ स्वयं प्र

॥२॥

दुग्धेव तस्मै गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी ॥१८॥ महौजसो मानधना धनार्चिता
धनुर्भृतः संयति लब्धकीर्तयः ॥ न संहतास्तस्य न भिन्नवृत्तयः प्रियाणि वांछंत्यसुभिः
समीहितुं ॥१९॥ महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः ॥ महोदयैः
स्तस्य हितानुबंधिभिः प्रतीयते धातुरिवेहितं फलैः ॥२०॥ न तेन सज्यं क्वचिदुद्यतं धनुः कृ
तं न वा कोपविजिह्ममाननं ॥ गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शा
सनं ॥२१॥ स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः ॥ मखेष्वखि
न्नोनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसं ॥२२॥ प्रलीनभूपालमपि स्थिरायति
प्रशास्त्यावारिधिमंडलं भुवः ॥ स चिंतयत्येव भियस्त्वदेष्यतीरहो दुरंता बलवद्विरोधिता
२३ कथाप्रसंगेन जनैरुदाहृतादनुस्मृताखंडलसूनुविक्रमः ॥ तवाभिधानाद्व्यथते

कि॰ सर्ग १ नताननः स्मुदुःसहान्मंत्रपदादिवोरगः॥२४॥ तदाशुकर्तुं त्वयिजिह्ममुद्यते विधीयतां त
॥ ३ ॥ त्र विधेयमुत्तरं॥ परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां धियः॥२५॥
इतीरयित्वा गिरमात्तसत्क्रिये गतेथ पत्यौ वनसंनिवासिनां॥ प्रविश्य कृष्णा सदनं मही
भुजा तदाचचक्षेनुजसंनिधौ वचः॥२६॥ निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्याश्च वि
नियंतुमक्षमा॥ नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः॥२७॥ भ
वादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनं॥ तथापि वक्तुं व्यवसाययंति मां
निरस्तनारीसमया दुराधयः॥२८॥ अखंडमाखंडलतुल्यधामभिः चिरं धृता भूपतिभिः
स्ववंशजैः॥ त्वया स्वहस्तेन मही मदच्युता मतंगजेन स्रगिवापवर्जिता॥२९॥ व्रजंति ते मू
ढधियः पराभवं भवंति मायाविषु ये न मायिनः॥ प्रविश्य हि घ्नंति शठास्तथाविधानसंवृ ॥ ३ ॥

तांगान्निशिता इवेषवः॥३०॥ गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधि
पः॥ परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियं॥३१॥ भवंतमेतर्हि मनस्वि
गर्हिते विवर्तमानं नरदेव वर्त्मनि॥ कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्नि
रुच्छिखः॥३२॥ अवंध्यकोपस्य विहंतुरापदां भवंति वश्याः स्वयमेव देहिनः॥ अमर्षशून्ये
न जनस्य जंतुना न जातहार्देन न विद्विषादरः॥३३॥ परिभ्रमँल्लोहितचंदनोचितः पदाति
रंतर्गिरि रेणुरूषितः॥ महारथः सत्यधनस्य मानसं दुनोति कच्चिदयं वृकोदरः॥३४॥
विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः॥ स वल्कवासांसि
तवाधुनाहरन्करोति मन्युं न कथं धनंजयः॥३५॥ वनांतशय्याकठिनीकृताकृती
कचाचितौ विष्वगिवागजौ गजौ॥ कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे

किन्त १

॥४॥

नबाधितुं ॥३६॥ इमामहंवेदनतावकींधियंविचित्ररूपाः खलुचित्तवृत्तयः॥ विचिंतयं
त्याभवदापदंपरांरुजंतिचेतः प्रसभंममाधयः॥३७॥ पुराधिरूढः शयनंमहाधनंवि
बोध्यसेयः स्तुतिगीतिमंगलैः॥ अदभ्रदर्भामधिशय्यसस्थलींजहासिनिद्रा
मशिवैः शिवारुतैः॥३८॥ अनारतंयौमणिपीठशायिनावरंजयद्राजशिरस्रजांरजः॥
निषीदतस्तौचरणौवनेषुतेमृगद्विजैर्लूनशिखेषुबर्हिषां॥३९॥ पुरोपनीतंन्रपराम
णीयकंद्विजातिशेषेणयदेतदंधसा॥ तदद्यतेवन्यफलाशिनः परंपरैतिकार्श्यंयश
सा॥समंवपुः॥४०॥ इदंवन्निमित्तायदियंदशाततः समूलमुन्मूलयतीवमेमनः॥ परै
परैर्यासितवीर्यसंपदांपराभवोप्युत्सवएवमानिनां॥४१॥ विहायशांतिंन्रपधाम
तत्पुनः प्रसीदसंधेहिवधायविद्विषां॥ व्रजंत्यशत्रूनवधूयनिस्पृहाः शमेनसिद्धिंमुनयो ॥४॥

नभूभृतः॥४२॥ पुरःसराधामवतांयशोधनाः सुदुःसहंप्राप्यनिकारमीदृशं॥ भवा
दृशाश्चेदधिकुर्वतेरतिंनिराश्रयाहंतहतामनस्विता॥४३॥ अथक्षमामेवनिरस्तवि
क्रमश्चिरायपर्येषिसुखस्यसाधनं॥ विहायलक्ष्मीपतिलक्ष्मकार्मुकंजटाधरः स
न्जुहुधीहपावकं॥४४॥ नसमयपरिरक्षणंक्षमंतेनिकृतिपरेषुपरेषुभूरिधाम्नः॥
अरिषुहिविजयार्थिनः क्षितीशाविदधतिसोपधिसंधिदूषणानि॥४५॥ विधिसम
यनियोगाद्दीप्तिसंहारजिह्मंशिथिलबलमगाधेमग्नमापत्पयोधौ॥ रिपुतिमिर
मुदस्योदीयमानंदिनादौदिनकृतमिवलक्ष्मीः स्त्वांसमभ्येतुभूयः॥४६॥ श्री॥
इतिश्रीकिरातार्जुनीयेमहाकाव्येलक्ष्म्यंकेभारविकृतौव्यवसायदीपनोनामप्र
थमः सर्गः॥१॥ ॥विहितांप्रियय्यामनः प्रियामथनिश्चित्यगिरंगरीयसीं॥

कि॰ न॰ २

॥५॥

उपपत्तिमदूर्जिताश्रयंन्नृपमूचेवचनंवृकोदरः॥१॥ यदवोचदवेक्ष्यमानिनीपरितःस्नेह
मयेनचक्षुषा॥ अपिवागधिपस्यदुर्वचंवचनंतद्विदधीतविस्मयं॥२॥ विषमोपिविगाह्यतेन
यःकृततीर्थःपयसामिवाशयः॥ सतुतत्रविशेषदुर्लभःसदुपन्यस्यतिकृत्यवर्त्मयः॥३॥
परिणामसुखेगरीयसीव्यथकेस्मिन्वचसिक्षतौजसां॥ अतिवीर्यवतीवभेषजेबहु
रल्पीयसिदृश्यतेगुणः॥४॥ इयमिष्टगुणायरोचतांरुचिरार्थापिभवतेनभारती॥ ननुवक्तृवि
शेषनिस्पृहागुणगृह्यावचनेविपश्चितः॥५॥ चतसृष्वपितेविवेकिनीनृपविद्यासुनिरू
ढिमागता॥ कथमेत्यमतिर्विपर्ययंकरिणीपंकमिवावसीदति॥६॥ विधुरंकिमतःपरंपरैर
वगीतांगमितेदशामिमां॥ अवसीदतियत्सुरैरपित्वयिसंभावितवृत्तिपौरुषं॥७॥
द्विषतामुदयःसुमेधसागुरुरस्वंततरःसुमर्षणः॥ नमहानपिभूतिमिच्छताफलसं ॥५॥

= अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया॥ अपयांत्यचिरान्महीभुजां जननिर्वाद...

पत्प्रवणःपरिक्षयः॥८॥ अचिरेणपरस्यभूयसींविपरीतांविगणय्यचात्मनः॥
क्षययुक्तिमुपेक्षतेकृतीकुरुतेतत्प्रतिकारमन्यथा॥९॥ क्षययुक्तमपिस्वभावजं
दधतंधामशिवंसमृद्धये॥ प्रणमंत्यनपायमुत्थितंप्रतिपच्चंद्रमिवप्रजानृपं॥११॥ प्रभ
वःखलुकोशदंडयोःकृतपंचांगविनिर्णयोनयः॥ सविधेयपदेषुदक्षतांनियतिंलोक
मिवानुरुध्यते॥१२॥ अभिमानवतोमनस्विनःप्रियमुच्चैःपदमारुरुक्षतः॥ विनिपातनि
वर्तनक्षमंमतमालंबनमात्मपौरुषं॥१३॥ विपदोभिभवंत्यविक्रमंरहयत्यापदुपे
तमायतिः॥ नियतालघुतानिरायतेरगरीयान्नपदंनृपश्रियः॥१४॥ तदलंप्रति
पक्षमुन्नतेरवलंब्यव्यवसायवंध्यतां॥ निवसंतिपराक्रमाश्रयानविषादेनसमं
समृद्धयः॥१५॥ अथचेदवधिःप्रतीक्ष्यतेकथमाविष्कृतजिह्मवृत्तिना॥ धृतराष्ट्र

२ इति कारोति वैरेस्तनीयतीत्यर्थः १ अथवा दाद्वषदात्तत्र ... कृतं मत्यर्पितमित्यर्थः १
न इच्छति महति तेजस्विनः परायत्तराजित्वं न सुखं ४ अलं न किंचित्साध्य·
मित्यर्थः २ प्रकटितपराक्रमैः २

कि॰ त २ कृतिनः कृत्स्नजाश्रियमास्वाद्य नरेंद्रसंपदः ॥१६॥ द्विषता विहितं त्वयाथवा यदि ल
॥९॥ ब्धा पुनरात्मनः पदं ॥ जननाथ तवानुजन्मनां कृतमाविष्कृतपौरुषैर्भुजैः ॥१७॥ मद मदवर्षिभिरित्यर्थः
सिक्तमुखैर्मृगाधिपः करिभिर्वर्तयते स्वयं हतैः ॥ लघयन्खलु तेजसा जगन्न म स्वेनैव हतैः ३
हानिच्छति भूतिमन्यतः ॥१८॥ अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यश गमनशीलैः अस्थिरैः ४
चेतुमिच्छतः ४ श्चिचीषतः ॥ अचिरांशुविलासचंचला ननु लक्ष्मीः फलमानुषंगिकं ॥१९॥ ज्वलि स्फुरणं तडित्तं चंचला आनिकेत्यर्थः ४
तं न हिरण्यरेतसं चयमास्कंदति भस्मनां जनः ॥ अभिभूतिभयादसूनतः सु
खमुज्झंति न धाम मानिनः ॥२०॥ किमपेक्ष्य फलं पयोधरान्ध्वनतः प्रार्थयते
मृगाधिपः प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥२१॥ कुरु ॥९॥

५ ननु युद्धात्याक्षिकेऽपि यल्लाभः नुपायां तैरस्त न तथेत्याशंक्याह ५
४ अन्यायचयशिखिमानप्राणजं

न्मतिमेव विक्रमे नृप निर्धूय तमः प्रमादजं ध्रुवमेतदवेहि विद्विषां त्वदनुत्साहहता
विपत्तयः २२ द्विरदानिव दिग्विभावितांश्चतुरस्तोयनिधीनिवायतः प्रसहेत रणे
तवानुजान्द्विषतां कः शतमन्युतेजसः २३ ज्वलतस्तव जातवेदसः सततं वैरिकृ
तस्य चेतसि विदधातु शमं शिवेतरा रिपुनारीनयनांबुसंततिः २४ इति दर्शित
विक्रियं सुतं मरुतः कोपपरीतमानसं उपसांत्वयितुं महीपतिर्द्विरदं दुष्टमिवो
पचक्रमे २५ अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मंगलास्पदे विमला तव वि
स्तरे गिरां मतिरादर्श इवाभिदृश्यते २६ स्फुटता न पदैरपाकृता न च न स्वीकृत
मर्थगौरवं रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् २७ उपपत्तिरु
दाहृता बलादनुमानेन न चागमः क्षतः इदमीदृगनीदृगाशयः प्रसभं वक्तुमुप

किरा॰ २ क्रमते कः २८ अभिवृत्ततयात थापि मे हृदयं निर्णयमेव धावति अवसाययितुं
क्षमाः सुखं न विधेयेषु विशेषसंपदः २९ सहसा विदधीत न क्रियाम विवेकः प
८ रमापदां पदं वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ३० अ
भिवर्षति यो नुपालयन् विधिवीजानि विवेकवारिणा स सदा फलशालिनीं क्रियां
शरदं लोक इवाधितिष्ठति ३१ शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलंक्रि
या प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः ३२ मतिभेदतमस्तिरो
हिते गहने कृत्यविधौ विवेकिनां सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थद ८
र्शनं ३३ स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः विधिहेतुरहे
तुरागसां विनिपातोपि समः समुन्नतेः ३४ शिवमौपयिकं गरीयसीं

फलनिष्पत्तिमदूषितायतिं विगणय्य नयंति पौरुषं विजितक्रोधरया जिगीषवः ३५
अपनेयमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः अविभिद्य निशाकृतं तमः प्रभया
नांशुमताप्युदीयते ३६ बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः क्ष
यपक्ष इवैंदवीः कलाः सकला हंति स शक्तिसंपदः ३७ समवृत्तिरुपैति मार्दवं स
मये यश्च तनोति तिग्मतां अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीप
तिः ३८ क्व चिराय परिग्रहः श्रियां क्व च दुष्टेंद्रियवाजिवश्यता शरदभ्रचलाश्च
लेंद्रियैरसुरक्षा हि बहुच्छलाः श्रियः ३९ किमसामयिकं वितन्वता मनसः क्षो
भमुपात्तरंहसः क्रियते पतिरुच्चकैरपां भवता धीरतयाधरीकृतः ४० श्रुतम
प्यधिगम्य ये रिपून्विनयंते न शरीरजन्मनः जनयंत्यचिराय संपदामयशस्ते ख

कि॰२ लुषापलाश्रयं ४१ अतिपातितकालसाधनास्वशरीरेंद्रियवर्गतापिनी जनव
न्नभवंतमक्षमानयसिद्धेरपनेतुमर्हति ४२ उपकारकमायतेर्भृशंप्रसवः कर्मफ
लस्यभूरिणः अनपायिनिबर्हणंद्विषांनतितिक्षासममस्तिसाधनं ४३ प्रणतिप्र
८ वणान्विहायनः सहजप्रेमनिबद्धचेतसः प्रणमंतिसदासुयोधनंप्रथमेमानभृ
तांनवृष्णयः ४४ सुहृदःसहजास्तथेतरेमतमेषांनविलंघयंतिये विनयादिव
यापयंतियेधृतराष्ट्रात्मजमात्मसिद्धये ४५ अभियोगइमान्महीभुजोभव
तातस्यकृतः कृतावधेः प्रतिघाटयितासमुत्पतन्हरिदश्वः कमलाकरानिव
४६ उपजापसहान्विलंघयन्सविधातानृपतीन्मदोद्धतः सहतेन
जनोप्यधः क्रियांकिमुलोकाधिकधामराजकं ४७ ॥ ॥ ॥ ८

दोद्धतः सहतेनजनोप्यधः क्रियांकिमुलोकाधिकधामराजकं ४७ असमापितकृ
त्यसंपदांहतवेगंविनयेनतावता प्रभवंत्यभिमानशालिनांमदमुत्तंभयितुंविभूत
यः ४८ मदमानसमुद्धतंनृपंनवियुंक्तेनियमेनमूढता अतिमूढउदस्यतेनया
न्नयहीनादपरज्यते जनः ४९ अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसंत
तिः सुकरस्तरुवत्सहिष्णुनारिपुरुन्मूलयितुंमहानपि ५० अणुरप्युपहंतिवि
ग्रहः प्रभुमंतःप्रकृतिप्रकोपजः अखिलंहिहिनस्तिभूधरंतरुशाखांतनिघर्षजा
नलः ५१ मतिमान्विनयप्रमाथिनः समुपेक्षेतसमुन्नतिंद्विषः सुजनःखलु
नादृगंतरेविपदंताह्यविनीतसंपदः ५२ लघुवृत्ततयाभिदांगतंबहिरंतश्चनृप
स्यमंडलं अभिभूयहरत्यनंतरः शिथिलंकूलमिवापगारयः ५३ अनुशासतमित्यनावि

कि०त
१

लंनयवर्त्मीकुलमर्जुनाग्रजं स्वयमर्थद्वाभिवाञ्छितः स्तमभीयायपराशरात्मजः
५४ मधुरैरवशानिलंभयन्नपितिर्यंचिशमंनिरीक्षितैः परितःपटुबिभ्रदेनसां द
हनंधामविलोकनक्षमं ५५ सहसोपगतःसविस्मयंतपसांसूतिरसूतिरेनसां
ददृशेनमहीभुजामुनिः सवपुष्मानिवपुण्यसंचयः ५६ अथोर्ध्वकेशासनतःपरार्ध्या
दुद्यत्सधूतारुणवल्कलाग्रः रराजकीर्णाकपिशांशुजालःशृंगात्सुमेरोरिवति
ग्मरश्मिः ५७ अवहितहृदयोविधायसार्हामृषिवदृषिप्रवरेगुरूपदिष्टां तदनु
मतमलंचकारपश्चात्प्रशमइवश्रुतमासनंनरेंद्रः ५८ व्यक्तोदितस्मितमयूखवि
भासितोष्ठस्तिष्ठन्मुनेरभिमुखंसविकीर्णधाम्नः तन्वंतमिद्धमभितोगुरुमंशु
जालंलक्ष्मीमुवाहसकलस्यशशांकमूर्तेः ५९ इतिश्रीकिरातार्जुनीयेम
हाकाव्येलक्ष्म्यंकेभारविकृतौव्यासागमनंनामद्वितीयःसर्गः ॥ श्री १

संस्तवःस्यात्परिचयइत्यमरः
अपरिचितानां
प्रकटयंतं जनयंतं
आल्हादकैः ऊर्ध्वप्रसारितैः कपिलवर्णाः

ततःशरच्चंद्रकराभिरामैरुत्सर्पिभिःप्रांशुमिवांशुजालैः बिभ्राणमानीलरुचंपि
शंगीर्जटास्तडित्वंतमिवांबुवाहं १ प्रसादलक्ष्मींदधतंसमग्रांवपुःप्रकर्षेणजनाति
लोकातिशयिना — गेन प्रसह्यचेतःसुसमासजंतमसंस्तुतानामपिभावमार्द्रं २ अनुद्धताकारत — शांताकारतया
याविविक्तां तन्वंतमंतःकरणस्यवृत्तिं माधुर्यविस्रंभविशेषभाजांकृतोपसंभाष
मिवेक्षितेन ३ धर्मात्मजोधर्मनिबंधिनीनांप्रसूतिमेनःप्रणुदांश्रुतीनां हेतुंतदभ्याग
मनेपरीप्सुःसुखोपविष्टंमुनिमाबभाषे ४ इतिकालापकं अनाप्तपुण्योपचयैर्दुरा — अकृतपुण्यसंचयैः
दुर्लभा — पाफलस्यनिर्धूतरजाःसवित्री तुल्याभवद्दर्शनसंपदेषावृष्टेर्दिवोवीतबलाहकायाः
५ अद्यक्रियाःकामदुघाःक्रतूनांसत्याशिषःसंप्रतिभूमिदेवाः आसंसृतेरस्मिज
गत्सुजातस्त्वय्यागतेयद्बहुमानपात्रं ६ श्रियंविकर्षत्यपहंत्यघानिश्रेयःपरिस्नौति
तनोतिकीर्तिं संदर्शनंलोकगुरोरमोघंतवात्मयोनेरिवकिंनधत्ते ७ श्च्योतन्म

कि॰त पूर्वेपिहिमधुतोमेननिवृत्तिंनिवृत्तिमेतिनकः समुद्भिन्नज्ञानवियोगखेदं त्व
त्सनिधावुच्छ्वसितीवचेतः ८ निराश्रयं प्राश्रकुतूहलित्वंमस्मात्स्वधीनंकिमुनिस्पृ
१० हाणां तथापिकल्याणकरींगिरंतेमांश्रोतुमिच्छामुखरीकरोति ९ इत्युक्तवानु
क्तिविशेषभासारम्यंमनःसमाधाय जयोपपत्तौ उदात्तवेतागिरमित्युदारां द्वैपायने
नाभिदधेनरेंद्रः १० विनीषुतांजन्मवतामलक्ष्मीयशोवनंसामुभयत्रभूतिं अभ्य
र्हिताबंधषुतुल्यरूपाविशेषितो वृत्तितपोधनानां ११ तथापिन भ्रंन्तपनावकी
र्नैः प्रह्वीकृतंमेहृदयंगुणौघैः वीतस्पृहाणामपिमुक्तिभाजांभवंतिभव्येषुहिपक्ष श्री
पाताः १२ युग्मं कृतान्नयूयंकिमुतस्यराज्ञःस्फूयोधनंवानगुणोरतीनाः यस्त्व
कवान्नवाः सर्वथाबलाद्वाद्वा मोहंविधत्तेविषयाभिलाषः १३ जहातुनैनंकथम १०

र्थीसाद्वःसंत्राध्यकुमादिषुनिष्पतेयः असाधकयोगाद्विजयांतराया प्रमाथिनी
नांविपदांपदानि १४ पथश्रुतायांसमितौरिपूणांधर्म्यांदधानेनकरंतिराय त्व
याविपुलत्वप्यावपत्तिरम्यमाविष्कृतंप्रेमपुरंगुणेषु १५ विधायविध्वंसनमात्मनी
नांशमेकवृत्तेभवतच्छलेन प्रकाशितत्वन्मतिशीलसाराः कृतोपकाराद्द्ववविद्विष
स्ते १६ लभ्याधरित्रीनवविक्रमेण न्यायांश्चवीर्यास्त्रबलेविपक्षः अतःप्रकर्षो
यविधिविधेयःप्रकर्षतंत्राहिरणेजयश्रीः १७ निःसप्तकस्तोजगतीपतीनांहंतायु
रूर्यस्यसजाम्यदन्यः वीर्यावधूतःस्मतदाविवदप्रकर्षमाधारवतांगुणानां १८ यस्मि
न्नैश्वर्यकृतव्यलीकः परामवंप्राप्तद्वांतकोपि धन्वन्नधनुःकस्यरणेनकुर्यान्नि
नामयेकपवृणांसभीष्मः १९ खंजनंमाजाविषुसंहनीर्वःसहेतकोपज्वलितंगुरुः
पोरस्फुरल्लोलशिखायजिह्वंजगत्त्रिघंस्संतमिवांतराहं २० निरीक्ष्यसंरंभनि

घ रा   ने

कि॰ त्र रस्तधैर्येंधुराधैमांधितजामदग्न्ये अस्त्रैंसंवुप्रसभंभयेषु जायेतमत्योरपिपक्ष
पातः २१ ययासमासादितसाधनेन सुदुश्चरामाचरतात पस्यां एतेदुरापंसम
११ वाप्यवीर्यमुन्मूलितारः कपिकेतनेन २२ महत्वयोगायमहामहिम्नामाराध
नींतांन्नृपदेवतानां दातुंप्रदानोचितभूरिधाम्नीमुपागतःसिद्धिमिवास्मिवि
द्यां २३ युग्मं इत्युक्तवंतंव्रजसाधयेति प्रमाणयन्वाक्यमजातशत्रोः प्रसे
दिवांसंतमुपाससादवसन्निवांतेविनयेनजिष्णुः २४ निर्यायविद्याथदिना धा
दिरम्याद्बिंबादिवार्कस्यमुखान्महर्षेः पार्थाननंवह्निकणावदाता दीप्तिःस्फु
रत्पद्ममिवाभिपेदे २५ योगंचतंयोग्यतमायतस्मैतपःप्रभावाद्वितनारस
घः येनास्यतत्त्वेषुकृतेवभासेसमुन्मिमीलेवचिरायचक्षुः २६ आकारमाशंसि
तभूरिलाभंदधानमंतःकरणानुरूपं नियोजयिष्यन्विजयोदयेत्वं तपःस १२

श्री   श्री

माधेमुनिरित्यवादीत् २७ अनेनयोगेनविवृद्धतेजा निजांपरस्मैपदवीमयच्छन्
समाचरान्वारमुपात्तशस्त्रो जपोपवासाभिषवैर्मुनीनां २८ करिष्यसेयत्रसुदुश्च
राणिप्रसत्तयेगोत्रभिदस्तपांसि शिलोच्चयंचारुशिलोच्चयंतमेषक्षणान्नेष्यति
न गुह्यकस्त्वां २९ इतिब्रुवाणेनमहेंद्रसूनुं महर्षिणातेनतिरोवभूवे तंराजराजानु
चरोस्यसाक्षात्प्रदेशमादेशमिवाधितस्थौ ३० कृतानतिर्व्याहृतसांत्ववादे जातस्य
हःपुण्यजनः प्रजिघ्यौ इयायसख्याविवसंप्रसादं विश्वासयत्याशुसतांहियो
गः ३१ अथोष्णभासेवसुमेरुकुंजान्विहीयमानानुदयायतेन बृहद्घृतीचदुः
खकृन्नात्मलाभंप्रतःशनैःपांडुसुतान्नपेदे ३२ असंशयालोचितकार्यनुन्नःप्रे
म्णासमानीयविभज्यमानः तुल्याद्विभागादिवतन्मनोभिर्दुःखातिभारोपिल

कि०त घुः समेने ३३ धैर्येण विश्वास्यतया महर्षेस्तीव्रादरातिप्रभवाश्च मन्योः वीर्यं च वि
१२ द्वत्सु सुते मघोनः स तेषु न स्थानमवाप शोकः ३४ तान्भूरिधाम्नश्चतुरोपि दूरं वि
हाय यामानिव वासरस्य एकौघभूतं तदशर्म कृष्णां विभावरीं ध्वांतमिव प्रपेदे
३५ तुषारलेखाकुलितोत्पलाभे पर्यश्रुणी मंगलभंगभीरुः अगूढभावापि वि
लोकने सा न लोचने मीलयितुं विषेहे ३६ अकृत्रिमस्नेहरसाभिरामं रामार्पितं
दृष्टिविलोभि दृष्टं मनःप्रसादांजलिनानिकामं जग्राह पाथेयमिवेंद्रसूनुः ३७
धैर्यावसादेन हृतप्रसादा वन्यद्विपेनेव निदाघसिंधुः निरुद्धबाष्पोदयसन्नकं
ठं उवाच कृच्छ्रादिति राजपुत्री ३८ मग्नां द्विषच्छद्मनि पंकभूते संभावनां भूतिमिवो
द्धरिष्यन् आधिद्विषामा तपसां प्रसिद्धेरस्मद्विना मा भृशमुन्मनीभूः ३९ यशो १३

धिगंतुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्तितुं वा निरुत्सुकानामभियोगभाजां
समुत्सुकेवांकमुपैति सिद्धिः ४० लोकं विधात्रा विहितस्य गोप्तुं क्षत्रस्य मुष्णन्वसु
जैत्रमोजः तेजस्विताया विजयैकवृत्तेर्निघ्नन्प्रियं प्राणमिवाभिमानं ४१ व्रीडा
नतैराप्तजनोपनीतः संशय्य कृच्छ्रेण नृपैः प्रपन्नः वितानभूतं विततं पृथिव्यां य
शः समूहन्निव दिग्विकीर्णं ४२ वीर्यावदानेषु कृतावमर्षस्तन्वन्नभूतामिव सं
प्रतीतिं कुर्वन्प्रयामक्षयमायतीनामर्कत्विषामह्न इवावशेषः ४३ प्रसह्य योस्मासु
परैः प्रयुक्तो वक्तुं न वाच्यः किमुताधिकर्तुं नवीकरिष्यत्युपशुष्य हार्दः स त्वद्विनामे आ
हृदयं निकारः ४४ इतिकालापकं प्रांशोभिमानव्यसनादसह्यं हंतीव दंतव्य
सनाद्विकारं द्विषस्तनापांनकरितोस्तेजाः शरद्धनाकीर्ण इवाद्रिरह्नः ४५ सव्रीड

कि०त मंदैरिवभिः क्रियत्वान्नात्यर्थमस्थैरवभासमानः यशः क्षयात्क्षीणजलार्णवाभस्त्व
मन्यमाकारमिवाभिपन्नः ४६ दुःशासनामर्षरजोविकीर्णैरेभिर्विनाथैरिव भाग्य
१३ नाथैः केशैः कदर्थीकृतवीर्यसारः कच्चित्स एवासि धनंजयस्त्वं ४७ इति विशे
षकं स क्षत्रियस्त्राणसहः सतां यस्तत्कार्मुकं कर्मसु यस्य शक्तिः वहन्द्वयीमप्यफलेर्थ
जाते करोत्यसंस्कारहतामिवोक्तिं ४८ वीतौजसः संन्निधिमात्रशेषा भवत्कृतां भूतिम
वेक्षमाणाः समानदुःखा इव नस्त्वदीयाः स— पार्थगुणा भजंते ४९ प्रक्षिप्यमाणं रिपु
भिः प्रमादान्नागैरिवालूनसटं मृगेंद्रं त्वां धूरियं योग्यतयाधिरूढा दीप्त्या दिनश्रीरि
व तिग्मरश्मिं ५० करोति यः शेषजनातिरिक्तां संभावनामर्थवतीं क्रियाभिः संसत्सु
जाते पुरुषाधिकारे न पूरणीं तं समुपैति संख्या ५१ प्रियेषु यैः पार्थ विनोपपत्तेर्वि १३

चिंत्यमानैः क्लममेति चेतः तव प्रयातस्य जयाय तेषां क्रियादघानां मघवा विघातं ५२ मा
गाश्चिरायैकचरः प्रमादं वसन्नसंबाधशिवेपि देशे मात्सर्यरागोपहतात्मनां हि स्ख
लंति साधुष्वपि मानसानि ५३ तदाशु कुर्वन्वचनं महर्षेर्मनोरथान्नः सफलीकुरु
ष्व प्रत्यागतं त्वास्मि कृतार्थमेव स्तनोपपीडं परिरब्धुकामा ५४ उदीरितां तामि
ति याज्ञसेन्या नवीकृतोद्ग्राहितविप्रकारां आसाद्य वाचं मनसा दिदीपे काष्ठा
मुदीचीमिव तिग्मरश्मिः ५५ अथाधिपश्यन्निव विद्विषः पुरः पुरोधसारोपित
हेतिसंहतिः बभार रम्योपि वपुः स भीषणं गतः क्रियां मंत्र इवाभिचारिकीं ५६
अविलंघ्यविकर्षणं परैः प्रथितज्यारवकर्म कार्मुकं अगतावरिदृष्टिगोचरं शितनि
१४ स्त्रिंशयुजौ महेषुधी ५७ यशसेव तिरोदधन्मुहुर्महसा गोत्रभिदायुधक्षतीः क

कि ४ वंसरलमुद्गहनूज्वलितंद्युतीतिरश्चांतरंदिवः ५८ अलकाधिपभृत्यदर्शि
२८ तंशिवमुर्वीधरवर्त्मसंप्रयान् हृदयानिसमाविवेशसःक्षणमुद्बाष्पदृशांतपो
म्तां ५९ विशेषकं अनुजगुरथदिव्यंदुंदुभिध्वानमाशाःसुरकुसुमनिपा
तैर्व्योम्निलक्ष्मीर्वितेने प्रियमिवकथयिष्यन्नालिलिंगस्फुरंतीभुवमनि
भृतवेलावीचिबाहुःपयोधिः ६० इतिश्रीकिरातार्जुनीयेमहाकाव्येल
क्ष्म्यंकेभारविकृतौअर्जुनप्रस्थानोनामतृतीयःसर्गः श्रीः ७ ॥
ततःसकूजत्कलहंसमेखलांसपाकसस्याहितपांडुतागुणां उपाससा
दोपजनंजनप्रियःप्रियामिवासादितयौवनांभुवं १ विनम्रशालिप्रसवौघ
शालिनीरपेतपंकाःससरोरुहांभसः ननंदपश्यन्नुपसीमसस्थलीरुपायनीभूतशर २८

शिखाज्वालाके किमोल्कांशिखा शिखाग्रे युग्मे लिषुद्वतिवैजयंती
अभिवर्षुः आकिंशीतयंत २ चूर्णिताः ३
विलासयामासुः

॥ विजिह्मशिखाजगतीरुहोववकैरुःकुसुमैः ॥ २ ॥ अवधूतपंकजपरागक
णैरनुजान्हवीसलिलवीचिभिदः ॥ परिरेभिरेभिमुखमेत्यसुखाःसुहृदः
सखायमिवतंमरुतः ॥ ३ ॥ उदितोपकंठस्खलनसंवलिताःस्फुटहंससारस प्रतिघातेन
विरावयुजः ॥ मुदमस्यमांगलिकतूर्यकृतांध्वनयःप्रतेनुरनुवप्रमपां ॥ ४ ॥ अव पंक्तीनामितिशेषः
रुग्णतुंगसुरदारुतरौनिचयेपुरःसुरसरित्पयसां ॥ सददर्शवेतसवनाचरितां
श्रेयस्करी
प्रणतिंबलीयसिविदूकरीं ॥ ५ ॥ विबभूवनालमवलोकयितुंपरितःसरो
जरजसारुणितं ॥ सरिदुर्वीयामिवसंततिमत्ततरंगरंगिकलहंसकुलं ॥ ६ ॥
क्षतानि दधतिक्षतीःपरिणतद्विरदेमुदिताःलियोषितिमदस्रुतिभिः ॥ अधिकां

तिर्यग्दंतप्रहारस्तुगजःपरिणतोमत ॥ २ निःपूर्व २ रथात्रपुष्पाविदुलशीतवानीरवंजुलाः इसमः ४
यामिहंतापृथः० स्तनांमुकमिवाश्रितं

तेषामादिविकारः महत्त्वतापीऽपि स्वभावैवेत्यर्थः

निश्चलीकृतवानित्यर्थः पीडयन् रुधिरवसद्रव्येत्यर्थः रुतैः भूभागादिवाद्यविकाराः

किरा० त ससेधासिबबंधधृतिं महते रुजन्नपि गुणाय महान् ॥७॥ अनुहेमवप्रमरुणैः स

२८ मतांगतमूर्मिभिः सहचरं पृथुभिः ॥ सरथांगनामवनितां करुणैरनुबध्नतीमभि

ननंद रुतैः ॥८॥ सितवाजिने निजगदू रुचयश्चलवीचिरागरचनापटवः ॥ म

णिजालमंभसि निमग्नमपि स्फुरितं मनोगतमिवाकृतयः ॥९॥ उपलाहतो

द्धततरंगभृतं जविना विधूयवितितं मरुता ॥ स ददर्श केतकशिखाविश

दं सरितः प्रहासमिव फेनमपां ॥१०॥ बहुबर्हिचंद्रकनिभं विदधे धृतिमस २८

स्यदानपयसां पटलं ॥ अवगाढमीक्षितुमिवेभपतिं विकसद्विलोचनशतं स

अट्टहासमिवेत्युत्प्रेक्षा डिंडिरोब्धिकफः फेनः इत्यमरः समौ वृंदकमेकौ वृंदमित्यमरः अनेकधा मयूरमेचकसदृशं

बहुशो मदांबुबिंदवः इत्यर्थः ऊर्ध्वविकच वनं

स्फुरनं निद्रापगमश्च विशिष्टप्राविष्टास्याः

विटपः पल्लवे स्तंबे विस्तारे स्तंबमालयोरिति विश्वः संगतः

रितः ॥११॥ प्रतिबोधजृंभणविभिन्नमुखी पुलिने सरोरुहदृशा ददृशे ॥ पतद

छमौक्तिकमणिप्रकरा गलदस्रबिंदुरिव शुक्तिवधूः ॥१२॥ शुचिरप्सु विद्रुमल स्वच्छः

ताविटपस्तनुसांद्रफेनलवसंवलितः ॥ स्मरदायिनः स्मरयति स्म भृशं दयिता

धरस्य दशनांशुभृतः ॥१३॥ आघ्राय उपलभ्य चंचलतरंगधृतं मदगंधमुत्थितव

[illegible] तां पयसः ॥ प्रतिदंतिनामिव स संबुबुधे करियादसामभिमुखान्करिणः ॥१४॥

स जगाम विस्मयमुदीक्ष्य पुरः सहसा समुत्पतितया फणिनः ॥ प्रहितं दिवि प्र

जविभिः श्वसितैः शरदभ्रविभ्रममपां पटलं ॥१५॥ स ततार सैकतवतीरभितः

फूत्कारैः सौंदर्यं ददर्श अतिचक्राम

अर्थात्किरिमिति शेषः२ अतोऽस्य वासितेऽस्मिन्सौम्यरूपे निश्चये तिकलितिवैसंती३
अध्यस्वरूपयोरस्त्रीत्वमित्यमरः३

मत्सी:२
शफरीपरिस्फुरितचारुदृशः॥ ललिताः सखीरिव बृहज्जघनाः सुरनिम्नगामुप
यतीः सरितः॥१६॥ अधिरुह्य पुष्पभरनम्रशिखैः परितः परिष्कृततलां तरुभिः॥
मनसः प्रसत्तिमिव मूर्ध्नि गिरेः शुचिमाससाद स वनांतभुवं॥१७॥ अनुसानु
पुष्पितलताविततिः फलितोरुभूरुहविविक्तवनः॥ धृतिमानतानततनयस्य हरे
स्तपसेऽधिवस्तुमचलामचलः॥१८॥ प्रणिधाय तत्र विधिनाथ धियं दधतः पु
रातनमुनेर्मुनितां॥ श्रममाददावसुकरं न तपः किमिवावसादकरमात्मवतां
॥१९॥ शमयन्धृतेंद्रियशमैकसुखः शुचिभिर्गुणैरघमयं स तमः॥ प्रतिवास

क्षितौ३ विस्तारयामास योगशास्त्रविधानेन २९ विजहर्ति३
तपश्चर्यार्थमधिवस्तुं२ न चकारः२ ध्येयविषयेनियम्य३ दुष्करं

आसक्तितिरस्कृतिरासितवतः२ तत्त्वावधारणं

रं सुकृतिभिर्ववृधे विमलः कलाभिरिव शीतरुचिः॥२०॥ अधरीचकार च विवेकगु
णादगुणेषु तस्य धियमस्तवतः॥ प्रतिघातिनीं विषयसंगरतिं निरुपप्लवः शमसुखा
नुभवः॥२१॥ मनसा जपैः प्रणतिभिः प्रयतः समुपेयिवानधिपतिं स दिवः॥ स
हजेतरौ जयशमौ दधती बिभरांबभूव युगपन्महसी॥२२॥ शिरसा हरिन्म
णिनिभः स वहन्कृतजन्मनोऽभिषवणेन जटाः॥ उपमां ययावरुणदीधितिभिः
परिमृष्टमूर्धनि तमालतरोः॥२३॥ धृतहेतिरप्यधृतजिह्ममतिश्चरितैर्मु
नीनधरयन्गुरुभिः॥ रजयांचकार विरजाः स मृगान्कमिवेशते रमयितुं
कमपि कर्तुं न सा कुर्वंतीति भावः९
तदा तदानीं युगपदेककालसर्वदा सदा इत्यमरः४

कि० ता०
३०

अनुकूलगामिनि

नगुणाः॥२४॥ अनुलोमपातिनमचंडगतिंकिरतासुगंधिमभितःपवनं॥अ
वधीरितार्तवगुणंसुखतांनयतारुचांनिचयमंशुमतः॥२५॥नवपल्लवांज
लिभृतःप्रचयेबृहतस्तरून्गमयतावनतिं॥स्तृणतातृणैःप्रतिनिशंमृदु
भिःशयनीयतामुपयतींवसुधां॥२६॥पतितैरपेतजलदान्नभसःपृषतै
रपांशमयताचरजः॥सदयालुनेवपरिगाढकृशःपरिचर्ययानुजगृहे
तपसा॥२७॥विशेषकं॥महतेफलायतदवेक्ष्यशिवंविकसन्निमित्तमु ३०
पलभ्यपुरः॥नजगामविस्मयवशंवशिनांननिहंतिधैर्यमनुभावगुणाः॥२८॥

कृतमृष्टरिवासरकृतंसुकृतैरुपलभ्यवैभवमनन्यभवं॥उपतस्थुरास्थितविषादधि
यःशतयज्वनोवनचरावसतिं॥२९॥विदिताःप्रविश्यविहितानतयःशिथिली
कृतेधिकृतकृत्यविधौ॥अनपेतकालमभिरामकथाःकथयांबभूवुरितिगोत्र
भिदे॥३०॥शुचिवल्कवीततनुरन्यतमस्तिमिरच्छिदामिवगिरौभवतः॥म
हतेजयायमघवन्ननघःपुरुषस्तपस्यति(तापयन्)तपञ्जगतीं॥३१॥सबिभर्तिभीष
णभुजंगभुजःपृथुविद्विषांभयविधायिधनुः॥अमलेनतस्यधृतसच्चरि
तोश्चरितेनचातिशयितामुनयः॥३२॥मरुतःशिवानवतृणाजगतीवि

कि०न

मलंनभोरुहसितिस्थिरपां॥ गुणसंपदानुगुणतां गमितः कुरुते स्वभक्तिमिव भूतगणः॥
३१ ॥३३॥ इतरेतरानभिभवेन मृगास्तमुपासते गुरुमिवांतसदः॥ विनमंति नास्य तरवः प्र
चये परवान्स तेन भवति वनगः॥३४॥ उरुसत्वमाह विपरिश्रमता परमं वपुः प्रथय
तीव जयं॥ शमिनोपि तस्य नवसंगमने विभुतानुषंगि भयमेति जनः॥३५॥ ऋ
षिवंशजः स यदि दैत्यकुले यदि वान्वये महति भूमिभृतां॥ चरतस्तपस्तव वने
षु सदा न वयं निरूपयितुमस्य गतिं॥३६॥ विगणय्य कारणमनेकगुणं निज ३१
यथवा कथितमल्पतया॥ असदप्यदः सहितुमर्हसि नः क वनेचराः क निपु

अर्कमर्कटमंडूकविडुवासववायवः। तुरंगमश्चिहंसी तोथुयभाष्यहलयोदश ३

णमतयः॥३७॥ उपलभ्य गुह्यकगणादिति तन्मनसः प्रियं प्रियसुतस्य तपः॥ नि
जुगोप हर्षमुदितं मघवान यवर्त्मगाः प्रभवतां हि धियः॥३८॥ प्रणिधाय चित्तमथ
भक्ततया विदितेप्यपूर्व इव तत्र हरिः॥ उपलब्धुमस्य मनसः स्थिरतां सुरसुंद
रीरिति वचोभिदधे॥३९॥ सुकुमारमेकमणुमर्मभिदामतिदूरगं युतममोघ
तया॥ अविपक्षमस्त्रमपरं कतमद्विजयाय यूयमिव चित्तभुवः॥४०॥ भववी
तये हतबृहत्तमसामवबोधवारि रजसः शमनं॥ परिपीयमाणमिव वोसकलैरवसा
दमेति नयनांजलिभिः॥४१॥ बहुधा गतां जगति भूतसृजा कमनीयतां समभि
॥

कि० न
३२
हंसपुरा ॥ उपपादिताविदधताभवतीःसुरसद्मयानसुमुखीजनता ॥ ४२ ॥ तदुपेत्य
विघ्नयततस्यतपःकृतिभिःकलासुसहिताःसचिवैः ॥ हृतवीतरागमनसांननुवः
सुखसंगिनंप्रतिसुखावजितिः ॥ ४३ ॥ अविमृश्यमेतदभिलष्यतिसद्विषतांवधेनवि
षयाभिरतिं ॥ भववीतयेनहितथासविधिःक्वशरासनंक्वचविमुक्तिपथः ॥ ४४ ॥
पृथुधाम्नितत्रपरिबोधिचमाभवतीभिरन्यमुनिवद्विकृतिः ॥ स्वयशांसिविक्रमव
तामवतांनवधूष्वघानिविमृशन्तिधियः ॥ ४५ ॥ आशंसितापचितिचारुपुरःसु ३२
राणामादिष्टमित्यभिमुखंसमवाप्यपत्युः ॥ लेभेपरांद्युतिममर्त्यवधूसमूहःसं

भावनाह्यधिकृतस्यतनोतितेजः ॥ ४६ ॥ प्रणतिमथविधायप्रस्थिताःसद्मन
स्ताःस्तनभरनमितांगीरंगनाःप्रीतिभाजः ॥ अचलनलिनलक्ष्मीहारिनालं
बभूवस्तिमितममरभर्तुर्द्रष्टुमक्ष्णांसहस्रं ॥ ४७ ॥ ॥ छ ॥ ॥ इतिश्रीकिरा
तार्जुनीयेमहाकाव्येलक्ष्म्यंकेभारविकृतौसुरांगनाप्रस्थानोनामषष्ठः
सर्गः ॥ ॥ छ ॥ ॥ श्री ॥ ॥ छ ॥ ॥ श्रीमद्भिःसरथगजैःसुरांगनानांगुप्तानां
प्रस्थानानंतरं व्याप्नुवन्
मथसचिवैस्त्रिलोकभर्तुः ॥ संमूर्छन्नलघुविमानरंध्रभिन्नःप्रस्थानंस प्रतिध्वनिभिरनेकीभूतः
मभिदधेमृदंगनादः ॥ १ ॥ सोत्कंठैरमरगणैरनुप्रकीर्णान्निर्यायज्वलित दीप्तिप्रभात
आकाशव्यापिरथ्यशतशेषः अस्मिन्सर्गेप्रहर्षिणावृत्तं कुक्षिकुहरेषु
अवेक्षणेनमुक्तैः निर्गत्य

रामाः स्त्रीः ... रामो रामो स्थिता स्थितौ कथमारितथाचंतपलैगोर ... लः ३

... धारा प्रधिनेमिरितियादवः नभाये सार्थकत्वं

अमरावत्याः

कि॰ त
३३

कैवपुरीं नमघोनः॥ रामाणामुपरि विवस्वतः स्थितानां न्नासेदे रविरगुणत्वमातपेन॥ २॥ प्र
तानामभिमुखपातिभिः समीरैरायासादविशदलोचनोत्पलानां॥ आनिन्ये मदविरितां बध्नरितिशेषः
श्रियं वधूनामुष्णांशुद्युतिजनितः कपोलरागः॥ ३॥ ति ... कथमपि देवतानुभावात
क्लेशैः प्रजविभिरायतं तुरंगैः॥ नेमीनामसतिविवर्त्तने रथौघैरासेदे वियति विमानव
त्वरतिः॥ ४॥ कांतानां कृतपुलकः स्तनांगरागे वक्त्रेषु च्युततिलकेषु मौक्तिकाभः॥ संप
देश्रमसलिलोद्गमो विभूषां रम्याणां विकृतिरपिश्रियं तनोति॥ ५॥ राजद्भिः पथि
मरुतामभिन्नरूपैरुल्कार्चिः स्फुटगतिभिर्ध्वजांशुकानां॥ तेजोभिः कनकनिकाष ३३

प्रविष्टिन्नाकारैः

ध्रुवनस्परार्थीनां

नानिदधिरे भुवनानामात्मनीव पतिते न विशेषाः॥ १२॥ इच्छतां सह वधूभिरभेदं यामिनीविर
नियमितोरिति ... नौ
हिणां विहगानां॥ आपुरेव मिथुनानि वियोगं लंघ्यते न खलु कालनियोगः॥ १३॥ यत्छतिप्र
तिमुखं दयितायैवावमंतिकगतेविशकुंतौ॥ नीयते स्म नतिमुज्झितहर्षं पंकजं मुखमि
वांबुरुहिण्या॥ १४॥ रंजिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु॥ पूरिता नु
संहृतादितिपाठेलोपिता
विषमेषु धरित्री संहृता नु ककुभस्तिमिरेण॥ १५॥ रात्रिरागमलिनानि विकासं पंकजा
नि रहयंति विहाय॥ स्पष्टतारकमियाय नभःश्रीर्वस्तुमिच्छति निरापदि सर्वः॥ १६॥ व्या
नशे शशधरेण विमुक्तः केतकीकुसुमकेसरपांडुः॥ चूर्णमुष्टिरिव लंभितकांतिर्वास
वस्य दिशमंशुसमूहः॥ १७॥ उज्झती शुचमिवाशु तमिस्रामंतिकं व्रजति तारकरा अरुणाम्
जे॥ दिक्प्रसादगुणमंडनमूहे रश्मिहासविशदं मुखमैंद्री॥ १८॥ नीलनीरजनिभे

कर्पूरक्षोदस्यमुष्टिरिवप्रः ३

मेनेतथापगुणः ... दमंडनं ... तमिस्रामस्त्री ध्वंतनिरिमि ... तारके तारके ... :

४८

समीपप्रकारेणेंदुनायके ॥ भावकं प्राप्तं मंगलं

कि० त
४५

हिमगोरंशोकरुहइववपुषः सितरश्मेः ॥ खे रराज निपतत्करजालं वारिधेः पयसि गां गमि
वांभः ॥१९॥ द्यां निरुंधदतिनीलघनाभं ध्वांतमुद्यतकरेण पुरस्तात् ॥ क्षिप्यमाणम
सितेतरभासा शंभुनेव गजचर्म चकासे ॥२०॥ अंतिकांतिकगतेंदुविसृष्टे जिह्मतां ऊ
हति दीधितिजाले ॥ निर्गतस्तिमिरभारनिरोधादुच्छ्वसन्निव रराज दिगंतः ॥२१॥ दी
प्यमानघनभः किरणौघैः कुंकुमारुणपयोधरगौरः ॥ हेमकुंभइव पूर्वपयोधेरुन्ममज्ज
शनकैस्तुहिनांशुः ॥२२॥ लेखया विमलविद्रुमभासा संततं तिमिरमिंदुरुदासे ॥ दं
ष्ट्रया कनकटंकपिशंग्या मंडलं भुव इवादिवराहः ॥२३॥ उद्गतेंदुमविभिन्नतमिस्रां
पश्यति स्म रजनीमवितृप्तः ॥ व्यंशुकस्फुटमुखीमतिजिह्मां व्रीडया नववधूमिव ४५
लोकः ॥२४॥ नप्रसा[?]दमुचितं गमिता द्यौर्नोद्धृतं तिमिरमद्रिवनेभ्यः ॥ दिङ्मु

टंकः पाषाणदारक इत्यमरः

उदयरागादिति भावः

तथापि तेन रात्रिः शोभितैव ॥ कोपात्कांतं पराङ्मुखं पश्चात्तापसमन्विता कलहांतरितेति मानिनी परिकीर्तिता

मंदप्रकारेण

खेषु न च धाम विकीर्णं भूषितैव रजनी हिमभासा ॥२५॥ मानिनीजनविलोचनपातानुष्णबा
ष्पकलुषान्प्रतिगृह्णन् ॥ मंदमंदमुदितः प्रययौ खं भीतभीत इव शीतमयूखः ॥२६॥ श्लि
ष्यतः प्रियवधूरुपकंठं तारकास्ततकरस्य हिमांशोः ॥ उद्धमन्नभिरराज समंतादंगरा
ग इव लोहितरागः ॥२७॥ प्रेरितः शशधरेण करौघः संहतान्यपि नुनोद तमांसि ॥ क्षी
रसिंधुरिव मंदरभिन्नः काननान्यविरलोच्चतरूणि ॥२८॥ शारतां गमितया शशि
पादैश्छायया विटपिनां प्रतिपेदे ॥ न्यस्तशुक्लबलिचित्रतलाभिस्तुल्यता वसति
वेश्ममहीभिः ॥२९॥ आतपे धृतिमता सह वध्वा यामिनीविरहिणा विहगेन ॥
सेहिरे न किरणा हिमरश्मेर्दुःखिते मनसि सर्वमसह्यं ॥३०॥ गंधमुद्धतरजःकण
वाही विक्षिपन्विकसतां कुमुदानां ॥ आदुधाव परिलीनविहंगा यामिनीमरुदपां
वनराजीः ॥३१॥ संविधातुमभिषेकमुदासे मन्मथस्य लसदंशुजलौघः ॥ यामि

भीतप्रकारेण

कि०त
४६

नीवनितपाततविद्धः सोत्पलोरजतकुंभइवेंदुः ॥३२॥ तेजसापि खलु नूनमनूनं ना
सहायमुपयाति जयश्रीः ॥ यद्विभुः शशिमयूखसखः सन्नाददे विजयिचापमनंगः ॥३३॥
सद्मनां विरचनाहितशोभैरागतप्रियकथैरपि दूत्यं ॥ सन्निकृष्टरतिभिः सुरदारैर्भू
षितैरपि विभूषणमीषे ॥३४॥ न स्रजो रुरुचिरे रमणीभ्यश्चंदनानि विरहे मदि
रा वा ॥ साधनेषु हि रतेरुपधत्ते रम्यतां प्रियसमागम एव ॥३५॥ प्रस्थिताभिरधि
नाथनिवासं ध्वंसितप्रियसखीवचनाभिः ॥ भामिनीभिरपहस्तितधैर्यः साद
यन्नपि मदो वललंबे ॥३६॥ कांतवेश्म बहु संदिशतीभिर्यातमेव रतये रमणी
भिः ॥ मन्मथेन परिलुप्तमतीनां प्रायशः स्खलितमप्युपकारि ॥३७॥ आशु कां ४६
तमभि[illegible]तवत्या योषितः पुलकरुद्धकपोलं ॥ निर्जिगाय मुखमिंदुमखंडं खंडप

त्रतिलक[illegible]तकांत्या ॥३८॥ उच्यतां स वचनीयमशेषं नेश्वरे परुषता सखि साध्वी ॥ आ
नयैनमनुनीय कथं वा विप्रियाणि जनयन्ननुनेयः ॥३९॥ किं गतेन न हि युक्तमुपै
तुं कः प्रिये सुभगमानिनि मानः ॥ योषितामिति कथासु समेतैः कामिभिर्बहुरसा
धृतिरूहे ॥४०॥ युग्मं ॥ योषितः पुलकरोधि दधत्या घर्मवारि नवसंगमजन्म ॥
कांतवक्षसि बभूव पतंत्या भूषणं लुलितमंडनतैव ॥४१॥ सीधुपानविधुरासु निग लोकेरिति शेषः
द्दन्मानमाशु शिथिलीकृतलज्जः ॥ संगतासु दयितैरुपलेभे कामिनीषु मदनो
नु मदो नु ॥४२॥ द्वारि चक्षुरधिपाणि कपोलौ जीवितं त्वयि कुतः कलहास्याः ॥ का
मिनामिति वचः पुनरुक्तं प्रीतये नवनवत्वमियाय ॥४३॥ साचि लोचनयुगं न
मयंती रुंधती दयितवक्षसि पातं ॥ सुभ्रुवो जनयति स्म विभूषां संगतावुपर
राम वलज्जा ॥४४॥ सव्यलीकमवधीरितखिन्नं प्रस्थितं सपदि कोपपदेन

कि० त
४७

योषितः सुहृदिव स्म रुणद्धि प्राणनाथमभिबाष्पनिपातः ॥ ४५ ॥ शंकिताय कृतबाष्पनिपाता
मीर्ष्यया विमुखितां दयिताय ॥ मानिनीमभिमुखस्थितनारितां शसंसति स्म घनरोमविभेदः
॥ ४६ ॥ लोलदृष्टि वदनं दयितायाश्चुंबति प्रियतमे रभसेन ॥ व्रीडया सह विनीवि नितंबादंशु
कं शिथिलतामुपपेदे ॥ ४७ ॥ ह्रीतया गलितनीवि निरस्यन्नंतरीयमवलंबितकांचि ॥
मंडलीकृतपृथुस्तनभारं सस्वजे दयितया हृदयेशः ॥ ४८ ॥ आहता नखपदैः परिरंभा
श्चुंबनानि घनदंतनिपातैः ॥ सौकुमार्यगुणसंभृतकीर्तिर्वाम एव सुरतेष्वपि कामः
॥ ४९ ॥ पाणिपल्लवविधूननमंतः सीत्कृतानि नयनार्धनिमेषाः ॥ योषितां रहसि गद्गदवाचा
मस्त्रतामुपययुर्मदनस्य ॥ ५० ॥ पातुमाहितरतीन्यभिलेषुस्तर्षयंत्यमृततुल्यरसा ४७ पुनरुक्त
नि ॥ सस्मितानि वदनानि वधूनां सोत्पळानि च मधूनि युवानः ॥ ५१ ॥ कांतसंगमप

ती २

राजितम[illegible]णीरसनशांतविवादे ॥ मानिनीजनउपाहितसंधौ संदधे धनुषि नेषुम
नंगः ॥ ५२ ॥ कुप्यताशु भवतानतचित्ताः कोपितांश्च वरिवस्यत यूनः ॥ इत्यनेकउपदेश इव
स्म स्वाद्यते युवतिभिर्मधुवारः ॥ ५३ ॥ भर्तृभिः प्रणयसंभ्रमदत्तां वारुणीमतिरसां रसयि
रहा त्वा ॥ ह्रीविमोहविरहादुपलेभे पाटवं नु हृदयं नु वधूभिः ॥ स्वादितः स्वयमथैधितमानं लंभितः
प्रियतमैः सह पीतः ॥ आसवः प्रतिपदं प्रमदानां नैकरूपरसतामिव भेजे ॥ ५५ ॥ भ्रूविला
ससुभगाननुकर्तुं विभ्रमानिव वधूनयनानां ॥ आददे मृदुविलोलपलाशैरुत्पलैश्चषकवी
चिषु कंपः ॥ ५६ ॥ ओष्ठपल्लवविदंशरुचीनां हृद्यतामुपययौ रमणानां ॥ फुल्ललोचनविनी
लसरोजैरंगनास्यचषकैर्मधुवारः ॥ ५७ ॥ प्राप्यते गुणवतापि गुणानां व्यक्तमाश्रयवशेन
विशेषः ॥ तत्तथा हि दयिताननदत्तं व्यानशे मधु रसातिशयेन ॥ ५८ ॥ वीक्ष्य रत्नचषकेष्वति

कि० त रक्तकांतदंतपदमंडनलक्ष्मी॥ जह्रिरेबहुमताः प्रमदानामोष्ठयावकनुदोमधुवाराः॥५९॥
५८ लोचनाधरकृताहृतरागावासिताननविशेषितगंधा॥ वारुणीपरगुणात्मगुणानांव्यत्य
यंविनिमयंनुवितेने॥६०॥ तुल्यरूपमसितोत्पलमक्ष्णोःकर्णगंनिरुपकारिविदित्वा॥
योषितःसुहृदिवप्रविभेजेलंभितेक्षणरुचिर्मदरागः॥६१॥ क्षीणयावकरसोप्यति
पानैराईदंतपदलंभितशोभः॥ आययावतितरामिववध्वाःसांद्रतामधरपल्ल
वरागः॥६२॥ रागकांतनयनेषुनितांतंविद्रुमारुणकपोलतलेषु॥ सर्वगा
पिददृशेवनितानांदर्पणेष्विवमुखेषुमदश्रीः॥६३॥ बद्धकोपविकृतीरपिरा
माश्चारुताभिमततामुपनिन्ये॥ वश्यतांमधुमदोदयितानामात्मवर्गहितमिच्छ ५८
तिसर्वः॥[illegible]॥वाससांशिथिलतामुपनाभिह्रीनिरासमपदेकुपितानि॥

योषितां[illegible]तीगुणपक्षेनिर्ममार्जमदिरावचनीयं॥६५॥ भर्तृषूपसखिनिक्षिपतीना
मात्मनोमधुमदोद्यमितानां॥ व्रीडयाविफलयावनितानांनस्थितंनविगतंहृदयेभ्यः॥
॥६६॥ रुंधतीनयनवाक्यविकासंसादितोभयकरापरिरंभे॥ व्रीडितस्यललितंयुव
तीनांक्षीवताबहुगुणैरनुजह्रे॥६७॥ योषिदुद्धतमनोभवरागामानवत्यपिययौ
दयितांकं॥ कारयत्यनिभृतागुणदोषेवारुणीखलुरहस्यविभेदं॥६८॥ आहितेनु
मधुनामधुरत्वेचेष्टितस्यगमितेनुविकासं॥ आबभौनवइवोद्धतरागःकामिनी
ष्ववसरःकुसुमेषोः॥६९॥ मागमन्मदविमूढधियोनःप्रोज्झ्यरंतुमितिशंकितनाथाः॥ यो
षितोनमदिरांभृशमीषुःप्रेमपश्यतिभयान्यपदेपि॥७०॥ चित्तनिर्वृतिविधा
यिविविक्तंमन्मथोमधुमदःशशिभासः॥ संगमश्चदयितैःस्मनयंतिप्रेमकामपिभुं भुवं

वंधमदानां ॥ ७१ ॥ धार्ष्ट्यलंघितयथोचितभूमौ निर्दयं विलुलिताळकमाल्ये ॥ मानि
नीरतिविधौ कुसुमेषुर्मत्तमत्तइव विभ्रममाप ॥ ७२ ॥ सीधुपानविधुरेषु वधूनां
निघ्नतामुपगतेषु वपुःषु ॥ ईहितं रतिरसाहितभावं वीतलज्जमपि कामिषु रेजे ॥
॥ ७३ ॥ अन्योन्यरक्तमनसामथ बिभ्रतीनां चेतोभुवः सुरसखाप्सरसां निदेशं ॥ वै
बोधिकध्वनिविभावितपश्चिमार्द्धा सा संहृतेव परिवृत्तिमियाय रात्रिः ॥ ७४ ॥ नि
द्राविनोदितनितांतरतिक्लमानामायामिमंगळनिनादविबोधितानां ॥ रामा
सु भाविविरहाकुलितासु यूनां तत्पूर्वतामिव समादधिरे रतानि ॥ ७५ ॥ कांता
जनं सुरतखेदनिमीलिताक्षं संवाहितुं समुपयानिव मंदमंदं ॥ हर्म्येषु माल्य
मदिरा[illegible]भोगगंधानाविश्चकार रजनीपरिवृत्तिवायुः ॥ ७६ ॥ आमो ४९

दवासित[illegible]ळाधरपल्लवेषु निद्राकषायितविपाटललोचनेषु ॥ व्यामृष्टपत्रतिल
केषु विलासिनीनां शोभां बबंध वदनेषु मदस्य शेषः ॥ ७७ ॥ गतवति नखले
खालक्ष्यतामंगरागे समदयितपीताताम्रबिंबाधराणां ॥ विरहविधुरमिष्टास तां
त्सखीवांगनानां हृदयमवललंबे रात्रिसंभोगलक्ष्मीः ॥ ७८ ॥ ॥ ७ ॥ ७ ॥
॥ ७ ॥ ॥ इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके भारविकविकृतौ संभोग
वर्णनो नाम नवमः सर्गः ॥ ९ ॥ ॥ ७ ॥ ७ ॥ ॥ अथ परिमळजामवाप्य लक्ष्मीम
वयवदीपितमंडनश्रियस्ताः ॥ वसतिमभिविहाय रम्यहावाः सुरपतिसूनुवि
लोभनाय जग्मुः ॥ १ ॥ द्रुतपदमभियातुमिच्छतीनां गगनपरिक्रमलाघवे
न तासां ॥ अवनिषु चरणैः पृथुस्तनीनामलघुनितंबतया चिरं निषेदे ॥ २ ॥

कि० त विहितयावसरसया बकेर्बभासेवरणतकैः कृतपद्धतिर्विधूनां ॥ अविरलवित
५० तेवशक्रगोपरूपणीतनीलतृणा[illegible]धरित्री ॥ ३ ॥ ध्वनिरगविवरस्नु लपा
पुराणांपृथुरसनागुणाशिंजितानुयातः ॥ प्रतिरवविततोवनानिचक्रे मुखर
समुत्सुकहंससारसानि ॥ ४ ॥ अवचयपरिभोगवंतिहिंस्रैः सहदूरितान्य च ४
मृगाणिकाननानि ॥ अभिदधुरभितोमुनिंवधूभ्यः समुदितसाध्वसवि
क्लवं चेतः ॥ ५ ॥ नृपतिमुनिपरिग्रहेणसाभूःसुरसखिवासरसांऽहार
तेतः ॥ उपहितपरमप्रभावधाम्नांनहिजयिनांतपसांअलंघ्यमस्ति ॥ ६ ॥ राम
सवकित[illegible]भिवविस्मयाकुलाभिः शुचिसिकतास्वतिमानुपालितानाभिः ॥ ५०
[illegible]

क्षितिषुदहशोरपदानिजिह्मारूपाहितकेतुरथांगलांछनानि ॥ ७ ॥ अतिशयि
तवनांतरद्युतीनांफलकुसुमावचयेपिनदिधानां ॥ ऋतुरिवतरुवीरुधांसमृ रू २
ध्यायुवतिजनैर्जगृहेमुनिप्रभावः ॥ ८ ॥ मृदितकिसलयः सुरांगनानांससस
लिलवल्कलभारभुग्नशाखः ॥ बहुमतिमधिकांययावशोकः परिजन
अहिंसादि तापिगुणायसद्गुणानां ॥ ९ ॥ यमनियमकृशीकृतस्थिरांगः परिददृशेवि
धृतायुधः सनाभिः ॥ अनुपमशमदीप्ततागरीयान्कृतपदपंक्तिरथर्वणे श्रीः
ववेदः ॥ १० ॥ सुरसरितिपरंतपोधिगच्छन्विधृतपिशंगबृहज्जटाक
लापः ॥ हविरिवविततः शिखासमूहैः समभिलषन्नुपवेदिजातवेदाः ॥ ११ ॥

कि० त
५१

शशधरइवलोचनाभिरामैर्गगनविसारिभिरंशुभिःपरीतः॥ शिखरनिचयमेकसा
नुसद्मासकलमिवापिदधन्महीधरस्य॥१२॥ सुदृशमतनुमाकृतेःप्रयत्नत
दनुगुणामपरैःक्रियामलंघ्यां॥ दधदलघुतपःक्रियानुरूपंविजयवतींचत
पःसमांसमृद्धिं॥१३॥ चिरनियमकृशोपिशैलसारःशमनिरतोपिदुरास
दःप्रकृत्या॥ ससचिवइवनिर्जनेपितिष्ठन्मुनिरपितुल्यरुचिस्त्रिलोकभ
र्तुः॥१४॥ कुलकं॥ तनुमवजितलोकसारधाम्नींत्रिभुवनगुप्तिसहांविलो
कयंत्यः॥ अवययुरमरस्त्रियोस्ययत्नंविजयफलेविफलंतपोधिकारे॥१५॥ ५१
मुनिदनुतनयान्विलोभ्यसद्यःप्रतनुबलान्यधितिष्ठतस्तपांसि॥ अ
लघुनिबहुमेनिरेचताःस्वंकुलिशभृताविहितंपदेनियोगं॥१६॥ अथकृ

तकविलोभनंविधित्सौयुवतिजनेहरिसूनुदर्शनेन॥ प्रसभमवततारचित्तजन्माहरतिम
नोमधुराहियौवनश्रीः॥१७॥ सपदिहरिसखैर्वधूनिदेशाद्ध्वनितमनोरमवल्लकीमृदंगैः
युगपदृतुगणस्यसन्निधानंवियतिवनेचयथायथंवितेने॥१८॥ सजलजलधरंनभोविरे
जेविवृतिमियायरुचिस्तडिल्लतानां॥ व्यवहितरतिविग्रहैर्वितेनेजलगुरुभिःस्तनितैर्दि
गंतरेषु॥२०॥ परिसुरपतिसूनुधामसद्यःसमुपदधन्मुकुलानिमालतीनां॥ विरल
मपजहारबद्धबिंदुःसरजसतामवनेरपांनिपातः॥२१॥ प्रतिदिशमनुगच्छताभिमृष्टः
ककुभविकाससुगंधिनानिलेन॥ नवइवविबभौसचित्तजन्मागतधृतिराकुलितश्चजीव त२
लोकः॥२२॥ व्यथितमपिभृशंमनोहरंती परिणतजंबुफलोपभोगहृष्टा॥ परभृतयुवति

कि॰त ॥५२॥ स्वनं वितेनेनवनवयोजितकंठरागरम्यं ॥२३॥ अभिभवतिमनःकदंबवायौ मदमधुरे चशिखं-
डिनांनिनादे ॥ जन इव नधृतेश्चचाल जिष्णुर्नहि महतांसुकरःसमाधिभंगः ॥२४॥ धृतबि-
सवलयावली र्विभ्रती कुमुद्वनैकदुकूलमात्तबाणा ॥ शरदमलतले सरोजपाणौ घनसमये
नवधूरिवालल्लंबे ॥२५॥ समदशिखिरुतानि हंसनादैः कुमुदवनानि कदंबपुष्परध्या ॥
श्रियमतिशयिनीं समेत्यजग्मुर्गुणमहतां महते गुणाय योगः ॥२६॥ सरजसमपहाय केत-
कीनां प्रसवमुपां ×त्य× तिकनीपरेणुकीर्णं ॥ प्रियमधुरसनानि षट्पदालिर्मलिनय-
ति स्म विनीलबंधनानि ॥२७॥ मुकुलितमतिशय्य बंधुजीवं धृतजलबिंदुषु शाद्वलस्थ- ५२॥
लीषु ॥ अविरलवपुषः सुरेंद्रगोपा विकचपलाशचयःश्रियं समीयुः ॥२७॥ अविरल-

प्रियंगुः फलिनी फली समरः॰

फलिनीवनप्रसूनः कुसुमितकुंदसुगंधिगंधवाहः ॥ गुणमसमयजं चिराय लेभे विरलतुषा-
हिमर्तः
रकणस्तुषारकालः ॥२८॥ निचयिनि लववल्लीलताविकासे विदधति लोध्रसमीरणे वहर्षे ॥ शै॰
विकृतिमुपययौ न पांडुसूनुश्चलति धियं तेन्नजिगीषतां हिवेतः ॥२९॥ कतिपयपुसहकार-
सिं॰ पुष्परम्यस्तनुतुहिनोल्पविनिद्रबुंधुवारः ॥ सुरभिमुखहिमागमांतशंसी समुपययौ
शिशिरः स्मरैकबंधुः ॥३०॥ कुसुमनगवनान्युपैतुकामा किसलयिनीमवलंब्य चूतय-
ष्टिं ॥ क्वणदलिकुलनूपुरं निरासे नलिनिवनेषु पदं वसंतलक्ष्मीः ॥३१॥ विकसि-
तकुसुमाधरं हसंतीं कुरबकराजिवधूं विलोकयंतं ॥ ददृशुरिव सुरांगना निषण्णं सशरम-
नंगमशोकपल्लवेषु ॥३२॥ श्वसनचलितपल्लवाधरोष्ठे नवविहितेर्ष्यमिवानधूनयंती ॥

कि०त
५२

मधकरभिणिषद्द्वेहन्पुष्पेमुखइवशाल्लतावधूश्चुचुंबे ||३३|| मुहुरनुपतता
विधूयमानंविरचितसंहतिदक्षिणानिलेन || अलिकुलमलकाकृतिंप्रपेदेनलिनैन
मुखांतविसर्पिपंकजिन्याः ||३४|| प्रभवतिनतदाम्बरोविजेतुंभवतिजितेंद्रियता
यदात्मरक्षा || अवजितभुवनस्तथाहिलेभेसिततुरगेविजयंनपुष्पमासः ||३५||
कथमिवतवसंमतिर्भवित्रीसममृतुभिर्मुनिनावधीरितस्य || इतिविरचितमल्लि
काविकासःस्मयतइवस्ममधुंनिदाघकालः ||३६|| बलवदपिबलंमिथोविरोधि प्र
भवतिनैवविपक्षनिर्जयाय || भुवनपरिभवीनयत्तदानींतमृतुगणःक्षणमुन्मनीचकार ||३७ ५२
ऋतिसुखमपुपुष्पितंसहायैरविरललांछनहारिणश्चकालाः || अविहितहरिसूनुविक्रि

प्रफुल्लिते

याणित्रिदशवधूषुमनोभुवंवितेनुः ३८ नदलितिनिचयेतयोत्पलानांनवविषमच्छदकुंदयू
मल्लिका
थिकासु अभिरतिमुपलेभिरेयथासांहरितनयावयवेषुलोचनानि ३९ मुनिमभिमु
खतांनिनीषवोयाःसुमुपययुःकमनीयतागुणेन मदनमुपदधेसएवताभ्योदुरधिगमाहि
गतिःप्रयोजनानां ४० प्रकृतमभिससारनाभिनैयंप्रविकसदंगुलिपाणिपल्लवंवा प्र
यममुपहितंविलासिवक्षुःसिततुरगेनववालनर्तकीनां ४१ अभिनयमनसःसुरांग
नायानिहितमलक्तकवर्तनाभिताम्रं चरणमभिपपातषट्पदालिर्धृतनवलोहितपंक
जाभिशंका ४२ अविरलमलसेषुनर्तकीनांद्रुतपरिषिक्तमलक्तकंपदेषु सवपुषमिव
चित्तरागमूहुर्नमितशिखानिकदंबकेसराणि। ४३ नृपसुतमभितःसमन्मथायाः

कि॰त
५४

परिजनगात्रतिरोहितांगयष्टेः॥ स्फुटमभिलषितंबभूववध्वावदतिहिसंवृतिरेवकामितानि ॥४४॥
अभिमुनिसहसाहृतेपरस्याघनमरुताजघनांशुकैकदेशे ॥ चकितमवसनोरुसत्रपायाःप्रति क
युवतीरपिविस्मयंनिनाय ॥४५॥ धृतबिसवलयेनिधायपाणौमुखमधिरूषितपांडुगंडले
खं॥ नृपसुतमपरास्मराभितापादमधुमदालसलोचनंनिदध्यौ ॥४६॥ सखिदयितमि
हानयेतिसामांप्रहितवतीकुसुमेषुणाभितप्ता ॥ हृदयमहृदयाननामपूर्वंभवदुपकंठमुपा
गतंविवेद ॥४७॥ चिरमपिकलितान्यपारयंत्यापरिगदितुंपरिशुष्यतामुखेन ॥ गतघृण
गमितानिसत्सखीनांनयनयुगैःसममार्द्रतांमनांसि ॥४८॥ अचकमतसपल्लवांधरित्रीं ५४
मृदुसुरभिंविरहय्यपुष्पशय्यां ॥ भृशमरतिमवाप्यतत्रचास्यास्तवसुखरश्मितमुपेतुमं

कमिच्छा ॥४९॥ तदनघतनुरस्तुसासकामाव्रजतिपुराहिपरासुतांत्वदर्थे ॥ पुनरपिसुल
भंतपोनुरागीयुवतिजनःखलुनाप्यतेनुरूपः ॥५०॥ जहिहिकठिनतांप्रयच्छवाचंननुकरु
णामृदुमानसंमुनीनां ॥ उपगतमवधीरयंत्यभव्याःसनिपुणमेत्यकयाचिदेवमूचे ॥५२॥
कुलकं ॥ ॥सललितचलितत्रिकाभिरामाशिरसिजसंयमनाकुलैकपाणिः॥ सुरपतितनयेप
रानिरासेमनसिजजैत्रशरंविलोचनार्द्धं ॥५३॥ कुसुमितमवलंब्यचूतमुच्चैस्तनुरिभकुंभपृ
थुस्तनोनतांगी ॥ तदभिमुखमनंगचापयष्टिर्विसृतगुणेवसमुन्ननामकाचित ॥५४॥ स
रभसमवलंब्यनीलमन्यावि(ग)लितनीविविलोलमंतरीयं ॥ अभिपतितुमनाःससाध्व
सेवच्युतरसनागुणासंदितावतस्थे ॥५४॥ यदिमनसिशमःकिमंगचापंशठविषयास्त

कि०त
५५
ववल्लभानमुक्तिः ॥ भवतु दिशति नान्यकामिनीभ्यस्तव हृदये हृदयेश्वरावकाशं ॥ ५५ ॥ इति
विषमितचक्षुषाभिधाय स्फुरदधरोष्ठमसूययोपकयाचित् ॥ अगणितगुरुमानलज्जयासौ
स्वयमुरसि श्रवणोत्पलेन जघ्ने ॥ ५६ ॥ युग्मं ॥ सविनयमपराभिसृत्य साचिस्मितसुभगैकल
सत्कपोललक्ष्मीः ॥ श्रवणनियमितेन तं निदध्यौ सकलमिवासकलेन लोचनेन ॥ ५७ ॥ क
रुणमभिहितं त्रपा निरस्ता तदभिमुखं च विमुक्तमश्रु ताभिः ॥ प्रकुपितमभिसारणेनुने
तुं प्रियमियती ह्यबलाजनस्य भूमिः ॥ ५८ ॥ असकलनयनेक्षितानि लज्जा गति
म बलसां परिपांडुताविषादः ॥ इति विविधमियाय तासु भूषा प्रभवति मंडयितुं वधू ५५
रनंगः ॥ ५९ ॥ अलसपदमनोरमं प्रकृत्या जितकलहंसवधूगति प्रयातं ॥ स्थितमुरु

जघनस्तनातिभाराद् उदितपरिश्रमजिह्मितेक्षणं वा ॥ ६० ॥ भृशकुसुमशरेषुपातमोहादन
वसितार्थपदाकुलोभिलापः ॥ अधिकवितततलोचनं वधूनामयुगपदुन्नमितानुवीक्षरागं त
॥ ६१ ॥ रुचिकरमपि नार्थवद्बभूव स्तिमितसमाधिशुचौ पृथातनूजे ॥ ज्वलति मनसि
मानिनाममर्षान्नहि लभते वसरं सुखाभिलाषः ॥ ६२ ॥ कालापकं ॥ स्वयं संराध्यैवं विशेषकं
शतमखमखंडेन यते स्म परोच्छिसालभ्यामभिलषति लक्ष्मीं हरिसुते ॥ मनोभिः सो
द्वेगैः प्रणयविहतिध्वस्तरुचयः सगंधर्वा धाम त्रिदशवनिताः स्वं प्रतिययुः ॥ ६३ ॥ छ ॥
३८ ॥ छ ॥ इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके भारविकृविरचिते अर्जुनविलोभनं
१७०५ नामदशमः सर्गः ॥ छ ॥ छ ॥ छ ॥ अथामर्षान्निसर्गाच्च जितेंद्रियतया तया ॥

आजगामाश्रमं जिष्णोः प्रतीतः पाकशासनः ॥ १ ॥ मुनिरूपोनुरूपेण सूनुना ददृशे पुरः ॥ द्रा
घीयसा वयोतीतः परिश्रांतः किलाध्वना ॥ २ ॥ जटानां कीर्णया केशैः संहत्या परितः सितैः
पृक्तयेंदुकरैरह्नः पर्यंत इव संध्यया ॥ ३ ॥ विशदभ्रूयुगच्छन्नवलितापांगलोचनः ॥ प्राले
यावततिम्लानपलाशाब्ज इव ह्रदः ॥ ४ ॥ आसक्तभरनीकाशैरंगैः परिकृशैरपि ॥ आद्यूनः
सद्गृहिण्येव प्रायो यष्ट्यावलंबितः ॥ ५ ॥ गूढोपि वपुषा राजन्धाम्ना लोकाभिभाविना ॥
अंशुमानिव तन्वभ्रमंडलच्छन्नमंडलः ॥ ६ ॥ कुंकुमं ॥ जरतीमपि बिभ्राणस्तनुमप्रा
कृताकृतिः ॥ चकाराक्रांतलक्ष्मीकः ससाध्वसमिवाश्रमं ॥ ७ ॥ अभितस्तं पृथा
सूनुः स्नेहेन परितस्तरे ॥ अविज्ञातेपि बंधौ हि बलात्प्रल्हादते मनः ॥ ८ ॥ आति

आकृष्यातै...

थेयीमथासाद्य सुतादपचितिं हरिः ॥ विश्रम्य विष्टरे नाम व्याजहारेति भारती ॥ ९ ॥ त्वया सा
धु समारंभि नवे वयसि यत्तपः ॥ ह्रीयते विषयैः प्रायो वर्षीयानपि मादृशः ॥ १० ॥ श्रेयसीं तव सं
प्राप्ता गुणसंपदमाकृतिः ॥ सुलभा रम्यता लोके दुर्लभं हि गुणार्जनं १२ ॥ शरदंबुधरच्छायाग
त्वर्यो यौवनश्रियः ॥ आपातरम्या विषयाः पर्यंतपरितापिनः ॥ १२ ॥ अंतकः पर्यवस्थाता ज
न्मिनः संततापदः ॥ इति त्याज्ये भवे भव्यो मुक्तावुत्तिष्ठते जनः ॥ १३ ॥ युग्मं ॥ चित्तवानसि
कल्याणी यत्त्वां मतिरुपस्थिता ॥ विरुद्धः केवलं वेषः संदेहयति मे मनः ॥ १४ ॥ युयुत्सुनेव
कवचं किमामुक्तमिदं त्वया ॥ तपस्विनो हि वसते केवलाजिनवल्कले ॥ १५ ॥ प्रपित्सोः किंच
ते मुक्तिं निस्पृहस्य कलेवरे ॥ महेषुधी धनुर्भीमं भूतानामनभिद्रुहः ॥ १६ ॥ भयंकरः प्राण

भयंमुख्येषु ... भेदाद्योग ... नातिरिति विश्वः ... बाहरा ... अतिशेषः ४

उदर्कः फलमुत्तरमित्यमरः ३

कि० त
५८

भृतां मत्स्योर्मुष्टिङ्द्वा परः ॥ असिस्तवतपस्थस्य न समर्थयते शमं ॥ १७ युग्मं ॥ जयमत्र
भवान्नूनमरातिष्वभिलाषुकः ॥ क्रोधलक्ष्म क्षमावंतः क्वायुधं क्व तपोधनाः ॥ १८ ॥ यः करो
ति वधोदर्का निःश्रेयसकरीः क्रियाः ॥ ग्लानिदोषछिदः स्वछाः स मूढः पंकयत्यपः ॥ १९ ॥
मूलं दोषस्य हिंसादेरर्थकामौ स्म मा पुषः ॥ तौ हि तत्वावबोधस्य दुरुछेदावुपप्लवौ ॥ २० ॥
अभिद्रोहेण भूतानामर्जयन्गत्वरीः श्रियः ॥ उदन्वानिव सिंधूनामापदामेति पात्रतां २१ ॥
या गम्याः सत्सहायानां यासु खेदो भयं यतः ॥ तासां किं यन्न दुःखाय विपदामिव संपदां ॥ २२ ॥ य
दुरासदानरीनुग्रान्धृतेर्विश्वासजन्मनः ॥ भोगान्भोगानिवाहेयानध्यास्यापन्न दुर्लभा ५८
॥ २३ ॥ नांतरज्ञाः श्रियो जातु प्रियैरासां न भूतयः ॥ आसक्तास्तास्वमी मूढा वामशीला हि जंतवः ॥ २४ ॥

आशीः ... भूयात् — वक्रस्वभावः

कोपवादस्कृति पदेयदर्शी लेषु वंचकाः ॥ साधुवृत्तानपि क्षुद्रा विक्षिपंत्येव संपदः ॥ २५ ॥ कृतवा
नन्यदेहेषु कर्त्ता च विधुरं मनः ॥ अप्रियैरिव संयोगो विप्रयोगः प्रियैः सह ॥ २६ ॥ शून्यमाकीर्ण
तामेति तुल्यं व्यसनमुत्सवैः ॥ विप्रलंभोपि लाभाय सति प्रियसमागमे ॥ २७ ॥ तदा रम्याण्यर
भवति
म्याणि प्रियाः शल्यं तदासवः ॥ तदेकाकी सबंधुः सन्निष्टेन रहितो यदा ॥ २८ ॥ युक्तः प्रमाद्य
सि हितादपेतः परितप्यसे ॥ यदि नेष्टात्मनः पीडा मा संगि भवता जने ॥ २९ ॥ कालापकं ॥ ज्ञाभि
नोस्य स्थितिं विद्वान् लक्ष्मीमिव चलाचलां ॥ भवान्मास्म वधीन्न्याय्यं न्यायाधारा हि साधवः ॥ ३० ॥
विजहीहि रणोत्साहं मा तपः साधु नीनशः ॥ उछेदं जन्मनः कर्त्तुमेधि शांतस्तपोधन ॥ ३१ ॥ जीयं
तां दुर्जया देहे रिपवश्चक्षुरादयः ॥ जितेषु ननु लोकोयं तेषु कृत्स्नस्त्वया जितः ॥ ३२ ॥ परवान्

भयः पुनः पुनः ख्यातं प्रभूतार्थेन नाव्ययमिति निश्चः ४ [illegible] ५

कि॰ ११ र्थसंसिद्धौ नित्यमत्रिरपत्रपः ॥ अविधेयेंद्रियः पुंसां गौरिवेति विधेयतां ॥ ३३ ॥ भवंत्यया सुखसंप
५८ त्तिस्मरणीयाधुनातनी ॥ इति स्वप्नोपमान्मत्वा कामान्मा गास्तदंगतां ॥ ३४ ॥ श्रद्धेयाविप्रल
ब्धारः प्रिया विप्रियकारिणः ॥ सुदुस्त्यजंतोपि कामाः कष्टा हि शत्रवः ॥ ३५ ॥ विविक्तेस्मिन्न
गे भूयः प्लाविते जह्नुकन्यया ॥ प्रत्यासीदति मुक्तिस्त्वां पुरा मा भूरुदायुधः ॥ ३६ ॥ व्याहृत्य मरु
तां पत्याविति वाचमवस्थिते ॥ वचः प्रश्रयगंभीरमथोवाच कपिध्वजः ॥ ३७ ॥ प्रसादरम्यमो
जस्विगरीयो लाघवान्वितं ॥ साकांक्षमनुपस्कारं विष्वग्व्यापि निराकुलं ॥ ३८ ॥ न्यायनिर्णी
तसारत्वान्निरपेक्षमिवागमे ॥ अप्रकंप्यतयान्येषामाम्नायवचनोपमं ॥ ३९ ॥ अलंघ्यत्वा ५८
ज्जनैरन्यैः क्षुभितोदन्वदूर्जितं ॥ औदार्यादर्थसंपत्तेः शांतं चित्तमृषेरिव ॥ ४० ॥ इद

युक्तिविशेषत्वाल्लाघ्यविशेषणयता दृ॰

व्याहरेत्

मीदृग्गुणोपेतं लब्धावसरसाधनं ॥ व्याकुर्यात्कः प्रियं वाक्यं यो वक्तानीदृगाशयः ॥ ४१ ॥ कालस्य
नज्ञानं तात यत्नस्य पौर्वापर्यममुष्यते ॥ शास्तितुं नयेमां धर्मं मुनिभिस्तत्त्वमिच्छसि ॥ ४२ ॥ अ
विज्ञानप्रबंधस्य वचो वाचस्पतेरपि ॥ व्रजत्यफलतामेव नयद्रुह इवेहितं ॥ ४३ ॥ श्रेयसोप्य
स्यैतं तात वचसो नास्मि भाजनं ॥ नभसः स्फुटतारस्य रात्रेरिव विपर्ययः ॥ ४४ ॥ क्षत्रियस्त
नयः पांडोरहं पार्थो धनंजयः ॥ स्थितः प्रास्तस्य दायादैर्भ्रातुर्ज्येष्ठस्य शासने ॥ ४५ ॥ द्वै
कद्वैपायनादेशादिदं भूमिव्रतमीदृशं ॥ भृशमाराधने यत्तः स्वाराध्यस्य मरुत्वतः ॥ ४६ ॥ दु
रक्षान्दीव्यता राज्ञा राज्यमात्मा वयं वधूः ॥ नीतानि पणतां नूनमीदृशी भवितव्यता ॥ ४७ ॥
तेनानुजसहायेन द्रौपद्या च मया विना ॥ भृशमायामियामासु यामिनीष्वभितप्यते ॥ ४८

कि० स०
५९

हृतोत्तरीयांप्रसभंसभायामागतह्रियः ॥ मर्मच्छिदानोवचसानिरतक्षन्नरातयः ॥४९॥ उ
पाधत्तसपत्नेषुकृष्णायागुरुसंनिधौ ॥ भावमानयनेसत्याः सत्यंकारमिवांतकः ॥५०॥ तामै २
क्षंतक्षणंसभ्यादुःशासनपुरःसरां ॥ अभिसायार्कमावृत्तांछायामिवमहातरोः ॥५१॥ अय
थार्थक्रियारंभैःपतिभिःकिंतवेक्षितैः ॥ अरुध्येतामितीवास्यानयनेबाष्पवारिणा ॥५२॥
स्खलत्यतिक्रांतिमिष्टाणिस्वच्छान्याकुलितान्यपि ॥ तोयानितोयराशीनांमनांसिचमनस्वि
नां ॥५३॥ धार्त्तराष्ट्रैःसहप्रीतिर्वैरमस्मास्वसूयत ॥ असन्मैत्रीहिदोषायकूलछायेवसे
विता ॥५४॥ सोढवान्नोदशामंत्यांज्यायानेवगुणप्रियः ॥ सुलभोहिद्विषांभंगोदुर्लभा ५९
सत्ववाच्यता ॥५५॥ अपवादादभीतस्यसमस्यगुरुदोषयोः ॥ असद्वृत्तेरहोवृत्तंदुर्विभाव्यं

रा०

विधेरिव ॥५६॥ ध्वंसेतहृदयंसद्यःपरिभूतस्यमेपरैः ॥ यद्यमर्षःप्रतीकारंभुजालंबंनलंबयेत्
॥५७॥ अवधूयारिभिर्नीताहरिणैस्तुल्यवृत्तितां ॥ अन्योन्यस्यापिजिह्रीमःकिंपुनःसहवा
सिनां ॥५८॥ शक्तिवैकल्यनम्रस्यनिःसारत्वाल्लघीयसः ॥ जन्मिनोमानहीनस्यतृणस्य
चसमागतिः ॥५९॥ अलंघ्यंतत्तदुद्वीक्ष्ययद्यदुच्चैर्महीभृतः ॥ प्रियतांज्यायसीमागान्म
हतांकेनतुंगता ॥६०॥ तावदाश्रीयतेलक्ष्म्यातावदस्यस्थिरंयशः ॥ पुरुषस्तावदेवा
सौयावन्मानान्नहीयते ॥६१॥ सपुमानर्थवज्जन्मायस्यनाम्निपुरःस्थिते ॥ ना
न्यामंगुलिमभ्येतिसंख्यायामुद्यतांगुलिः ॥६२॥ दुरासदवनज्यायान्गम्यस्तुं
गोपिभूधरः ॥ नजहातिमहौजस्कंमानप्रांशुमलंघ्यता ॥६३॥ गुरून्कुर्वंतितेवं

कि० त
६०

स्यात्मन्यर्थोतैर्वसुंधरा ॥ येषां यशांसि शुभ्राणि ह्रेपयंती दुमंडलं ॥ ६४ ॥ उदाहरणा
माशीःषु प्रथमे तेमनस्विनां ॥ शुक्के शान्तिरिवाम्नर्षायेस्स्वराति षुपात्यते ॥ ६५ ॥ न
सुखं प्रार्थयेनार्थमुदन्वद्वीक्षितं वकं ॥ अभिन्नस्य ततः शानेस्त्रस्य न्विथिकं ब्राह्मणःप
दं ॥ ६६ ॥ प्रमार्ष्टुमयशः पंकमिच्छेयं छद्मना कृतं ॥ वैधव्यतापितारातिवनिता
लोचनांबुभिः ॥ ६७ ॥ युग्मं ॥ अपहस्येव थवा सद्भिः प्रमादो वास्त्रमेधियः ॥ अ
स्थानविहितायासः कामं जिह्रेतु वा भवान् ॥ ६८ ॥ वंशं लक्ष्मीमनुद्धृत्य समु
च्छेदेन विद्विषां ॥ निर्वाणमपि मन्येहमंतरायं जयश्रियः ॥ ६९ ॥ अजन्मा
पुरुषस्तावद्गतासुस्तृणमेव वा ॥ यावन्नेषुभिरादत्ते विलुप्तमरिभिर्यशः ॥ ७० ॥ ६

अभिर्जयेन द्विषतां यस्यामर्षः प्रशाम्यति ॥ पुरुषोक्तिः कथं तस्मिन्ब्रूहि त्वं हि तपोध
न ॥ ७१ ॥ कृतं पुरुषशब्देन जातिमात्रावलंबिना ॥ योंगीकृतगुणैः श्लाघ्यः सविस्मय
मुदाहृतः ॥ ७२ ॥ असमानमिवौजांसि सदसा गौरवेरितं ॥ नाम यस्याभिनंदंति द्वि
षोपि स पुमान्पुमान् ॥ ७३ ॥ यथाप्रतिज्ञं द्विषतां युधि प्रतिचिकीर्षया ॥ मामेवा
प्येति नृपतिस्तृष्यन्निव जलांजलिं ॥ ७४ ॥ स वंशस्यावदातस्य शशांकस्येव
लांछनं ॥ कृच्छ्रेषु व्यर्थया यत्र भूयते भर्तुराज्ञया ॥ ७५ ॥ कथं वादीयतामर्वाग्मु
निताधर्मरोधिनी ॥ आश्रमानुक्रमः पूर्वैः स्मर्यते नव्यतिक्रमः ॥ ७६ ॥ आस
८८ काधिरियं हंत जननी दूरगा वमे ॥ तिरस्कारोति स्वातंत्र्यं ज्यायां श्राचारवान्नृपः ॥ ७७ ॥

कि०त११ स्वधर्ममनुरुध्यंतेनातिक्रममरातिभिः ॥ पलायंतेकृतध्वंसानाहवान्मानशालि
६१ नः ॥ ७८ ॥ विछिन्नाभ्रविलायंवाविलीयेनगमूर्द्धनि ॥ आराध्यवासहस्राक्ष
मयशःशल्यमुद्धरे ॥ ७९ ॥ इत्युक्तवंतंपरिरभ्यदोर्भ्यांतनूजमाविष्कृतदिव्यमू
र्त्तिः ॥ अघोपघातंमघवाविभूत्यैतस्मैभवाराधनमादिदेश ॥ ८० ॥ दृष्टेपिना
किनिमयासहसैलोकपालैर्लोकत्रयेपिविहिताप्रतिवार्यवीर्यः ॥ लक्ष्मींसमु
त्सुकयितासिभृशंपरेषामुच्चार्यवाचमितितेनतिरोबभूवे ॥ ८१ ॥ इति
श्रीकिरातार्जुनीयेमहाकाव्येलक्ष्म्यंकेभारविकृतौइंद्रागमनोनामैकादशः ६१
सर्गः ॥ छ ॥ छ ॥ श्री ॥ अथवासवस्यवचनेनरुचिरवदनस्त्रिलोचनं ॥

५२

क्लांतिरहितमभिराधयितुंविधिवत्तपांसिविदधेधनंजयः ॥ १ ॥ अभिरश्मिमालिविमल
स्यधृतजयधृतेरनाशुषः ॥ तस्यभुविबहुतिथास्तिथयःप्रतिजग्मुरेकचरणंनिषीदतः ॥ २ ॥
वपुरिंद्रियोपतपनेषुसततमसुखेषुपांडवः ॥ आपनगपतिरिवस्थिरतांमहतांहिधैर्यमवि
चिंत्यवैभवं ॥ ३ ॥ नपपातसन्निहितपक्तिसुरभिषुफलेषुमानसं ॥ तस्यशुचिनिशिशिरेपय
स्यमृतायतेहिसुतपःसुकर्मणां ॥ ४ ॥ नविसिस्मियेनविषसादमुहुरलसतांनवाददे ॥ सत्व
मुरुधृतिरजस्तमसीनहतस्मतस्यहतशक्तिकोमले ॥ ५ ॥ तपसाकृशंवपुरुवाहसवि पेलवे
जितजगत्त्रयोदयं ॥ त्रासजननमपितत्वविदांनतदस्तियन्नसुकरंमनस्विभिः ॥ ६ ॥ ज्व
लतोनलादनुनिशीथमधिकरुचिरंभसांनिधेः ॥ धैर्यगुणमवजयन्विजयीददृशेस
मुन्नततरःसशैलतः ॥ ७ ॥ जपतःसदाजपमुपांशुवदनमभितोविसारिभिः ॥ तस्य

कि०त१२ दधानकिरणोंऽशुमानिवपरिवेषभीषणामिवार्कमंडलं ॥ ८ ॥ कवचंसबिभ्रदुपवीतपदनिहि
६२ तसज्यकार्मुकः शैलपतिरिवमहेंद्रधनुःपरिवीतभीमगहनोविदिद्युते ॥ ९ ॥ प्रविवेशगा
मिवकृशस्यनियमसवनायगच्छतः तस्यपदविनमितोहिमवान्गुरुतांनयंतिहिगु
णान्नसंहतिः ॥ १० ॥ परिकीर्णमुद्यतभुजस्यभुवनविवरेदुरासदं ॥ ज्योतिरुपरिशिरसो
विततंजगृहेनिजान्मुनिदिवौकसांपथः ॥ ११ ॥ रजनीषुराजतनयस्यबहुलसमयेपि
धामभिः ॥ भिन्नतिमिरनिकरंनजहेशशिरश्मिसंगमयुजानभःश्रिया ॥ १२ ॥ महता
मयूखनिचयेनशमितरुचिजिष्णुजन्मना ॥ ह्रीतमिवनभसिवीतमलेनविराजते
स्मवपुरंशुमालिनः ॥ १३ ॥ तमुदीरितारुणजटांशुमधिगुणशरासनंजनाः रु
द्रमनुदितललाटदृशंददृशुर्मिमंथिषुमिवासुरीःपुरीः ॥ १५ ॥ मरुतांपतिःस्विदहि

मांशुरथपृथुशिखःशिखीतपः तप्तुमसुकरमुपक्रमतेनजनोयमित्य
वयवैःसतापसैः १५ नददाहभूरुहवनानिहरितनयधामदूरगं। नस्म
नयतिपरिशोषमपःसुसहंबभूवनचसिद्धतापसैः १६ विनयंगुणाइ
वविवेकमपनयभिदंनयाइव। न्यायमवधयइवाशरणाःशरणं
ययुःशिवमथोमहर्षयः १७ परिवीतमंशुभिरुदस्तदिनकरमयूख
मंडलैः शंभुमुपहतदृशःसहसानचतेनिचायितुमभिप्रसेहिरे १८
अथभूतभव्यभवदीशमभिमुखयितुंकृतस्तवाः तत्रमहसिदद

किरा स १२ रुः पुरुषं कमनीयविग्रहमयुग्मलोचनं १९ ककुदे वृषस्य कृतबाहु
६३ मकृशपरिणाहशालिनि स्पर्शसुखमनुभवंतमुमाकुचयुग्ममंडल
इवार्द्रचंदने २० स्थितमुन्नतेतुहिनशैलशिरसि भुवनातिवर्तिना
साद्रिजलधिजलवाहपथं सदिगन्तुवानमिव विरवमोजसा २१
अनुजानुमध्यमवसक्तविततवपुषा महाहिना लोकमखिलमिव
भूमिभृता रवितेजसामवधिनाधिवेष्टितं २२ परिणाहिना तुहि ६३
नराशिविशदमुपवीतसूत्रतां नीतमुरगमनुरंजयिता शशिना

गले न विलसन्मरीचिना २३ बहुभिश्च बाहुभिरहीनभुजगवल
यैर्विराजितं चंदनतरुमिव बालघुंभिर्धवलायितैर्मलयमेदिनी
भृतं २४ पूतमालतीसितकपालकुमुदमुपरुद्धमूर्द्धजं शेषमि
व सुरसरित्पयसः शिरसा विकाशिशशिधाम बिभ्रतं २५
कुलकं मुनयस्ततोऽभिमुखमेत्य नयनविनिवेशनादिताः पां
डुतनयतपसा जनितं जगतामशर्म भृशमाचचक्षिरे २६ तर
सैव कोपि भुवनैकपुरुष पुरुषस्तपस्यति ज्योतिरमलवपुषोपि
रवेरभिभूय वृत्र इव भीमविग्रहः २७ सधनुर्महेषुधि बिभर्ति क

किस१२ वचमस्तिभुत्तमं जटाः वल्कमाजिनमतिविचत्रमिदंमुनिनाविरोधि
६८ नचनास्यराजते २८ चलनेवनिश्चलितस्यकरणोनियमेसादिमु
खं स्तंभमनुभवतिरंगतमरुद्धतारकागणयुतंनभस्तलं २९
सततेजसाविजितसारम्ममरादितिजोपसंहिते विश्वमिदमपिद
धातिपुराकिमिवास्तियन्नबतेनदुष्करं ३० विजिगीषतेयदि
जगंतियुगपदथसंजिहीर्षति प्राप्तुमभवमभिवांछतिवावयम ६८
स्यनाविषहितुंक्षमारुचः ३१ किमुपेक्षसेकथयनाथनतवनावि
दितंनकिंचन त्रातुमलमभयदाहसिनस्त्वयिमास्मत्रासनि

भवत्पराभवः ३२ इतिगांविधायविरतेषुमुनिषुवचनंसमाद
दे भिन्नजलधिजलनादगुरुध्वनयन्दिशां विवरमंधकांतकः ३३
बदरीतपोवननिवासनिरतमवगात मान्यथा धातुरुदयनिधने
दधंजगतांनरमंशमादिपुरुषस्यगांगतं ३४ द्विषतःपरासि
सिषुरेषसकलभुवनाभितापिनः क्रांतकुलिशकरवीर्यबलान्म
दुपासनेविहितवान्महत्तपः ३५ अयमच्युतश्चवचनेनसरसीरुह सि३
जन्मनःप्रजाः पातुमसुरनिधनेनविभुर्भुवमभ्युपेत्यमनुजेषु
तिष्ठतेः ३६ सुरकृत्यमेतदवगम्यनिपुणमितिमूकदानवः

कि॰१२ हंतुमभिपतति पांडुसुतं त्वरयात दत्र सह गम्यतां मया ३७ वि
६५ वरेपि नैनमनिगूढमभिभवितुमेष पारयन् पापनिरतिरविशं
कितया विजयं व्यवस्यति वराहमायया ३८ निहिते विजेत
तत्किरातनृपतिवपुषा रिपौ मया मुक्तनिशितविशिखः प्र
सभं मृगयाविवादमयमाचरिष्यति ३९ तपसा निपीडित
कृशस्य विरहितसहायसंपदः सत्वविहितमतुलं भुजयो ६५
र्बलमस्य पश्यत मृधेधिकुप्यतः ४० इति तानुदारमनुनी
य विषमहरिचंदनालिना घर्मजनितपुलकेन लसद्गजमौ

क्तिकावलिगुणेन वक्षसा ४१ वदनेन पुष्पितलतांतनियमितविलंबि
मौलिना बिभ्रदरुणनयनेन रुचं शिखिपिच्छलांछितकपोलभित्ति
ना ४२ बृहदुद्वहन्जलदनादि धनुरुपहितैकमार्गणं मेघनिचयइ
व संववृते रुचिरः किरातपृतनापतिः शिवः ४३ कालापकं अनु
कूलमस्य च विचिंत्य गणपतिभिरात्तविग्रहैः शूलपरशुशरचापभृ
तैर्महती वनेचरचमूर्विनिर्ममे ४४ विरचय्य काननविभागमनु
गिरमथेस्वरात्तया भीमनिनदपिहितोरुभुवः परितोपदिश्य मृ
गयां वितस्थिरे ४५ क्षुभिताभिनिःसृतविभिन्नशकुनिमृ

कि॰१२ गयूथनिस्वनैः पूर्णपृथुवनगुहाविवरैः सहसाभयादिवररास
६६ भूधरः ४६ नविरोधिनीरुषमियायपथिमृगविहंगसंहतीः घ्नंति
सहजमपिभूरिभियःसममागताःसपदिवैरमापदः ४७ चमरीगणैर्गण
बलस्यबलवतिभयेप्युपस्थिते वंशवितातिषुविषक्तपृथुप्रियवालवाल
धिभिरादधेधृतिः ४८ हरसैनिकाःप्रतिभयेपिगजमदसुगंधिकेसरैः
स्वस्थमभिददृशिरेसहसाप्रतिबोधजृंभितमुखैर्मृगाधिपैः ४९ विभ्रमं ६६
बभूवुरपवृत्तजठरशफरीकुलाकुलाः पंकविषमिततटाःसरितःकरि
रुग्णचंदनरसारुणंपयः ५० महिषक्षतागुरुतमालनलदसुरभिःस

दागतिः व्यस्तशुकनिभशिलाकुसुमःप्रणुदन्ववौवनसदांपरिश्रमं ५१
मथितांभसोरयविकीर्णमृदितकदलीगवेधुकाः क्लांतजलरुहलताःसर
सीर्विदधेनिदाघइवसत्वसंप्लवः ५२ इतिचालयन्नचलसानुवनगहन
जानुमापतिः प्रापमुदितहरिणीदशनक्षतवीरुधंवसतिमैंद्रसूनवीं ५३
सतमाससादघननीलमभिमुखमवस्थितंमुनेः पोत्रनिकषणविभिन्न
भुवंदनुजंदधानमथसौकरंवपुः ५४ कच्छांतेसुरसरितोनिधायसेना
मन्वीतःसकतिपयैःकिरातवर्यैः प्रच्छन्नस्तरुगहनैःसगुल्मजालैर्लक्ष्मी
वाननुपदमस्यसंप्रतस्थे ५५ ॥ इतिश्रीकिरातार्जुनीयेमहा

कि० १३ ६७

उत्पादितवान्
अस्मिन् सर्गे ... शापोयमिति प्रतर्कयांचकार

काव्ये लक्ष्म्यंके भारवीकृतौ किरातार्जुनीये ...नाम द्वादशः सर्गः १२
वपुषां परमेण भूधराणाम् अथ संभाव्यपराक्रमं विभेदे मृगमाशु
विलोकयांबभूव स्थिरदंष्ट्रायतमुग्रमहेन्द्रसूनुः १ स्फुटबद्धसटोन्नतिः
स दूरादभिधावन्नवधीरितान्यकृत्यः जयमिच्छति तस्य जातशंके
मनसीमं मुहुराददे वितर्कं २ घनपोत्रविदीर्णशालमूलो निबिड
स्कन्धनिकाषरुग्णवप्रः अयमेकचरोऽभिवर्तते मां समराय यथा स
मा जुहूषमाणः ३ इह वीतभयास्तपोनुभावाज्जहति व्यालमृगाः
परेषु वृत्तिं मयि तां सुतरामसौ विधत्ते विकृतिः किं नु भवेदियं नु

प्राण्यंतरेषु १ जीविकां १ मद्विषये १
अथैकादशभिर्वितर्कमेव निरूपयति ४ एकाकी व्यूहादपेत इत्यर्थः ३
अतः सर्वथा नायमुपेक्ष्य इति भावः ३
कठिनेन मुखाग्रेण विदलितानि वृक्षमूलानि येन ४
व्यालो भुजंगमे क्रूरे श्वापदे दुष्टदंतिनि विश्वः
तपःसामर्थ्यं प्रसंगः १

आमाद्दूर समीपयोरित्यमरः २

पूर्वजन्मांतरे
माया ४ अथ वैषकृतेन सत्त्वपूर्वं भ्रमयामास वितथा रुषा नमु...
अवधूय विरोधिनीः किमारान्मृगजाताभिरभियाति मां जवेन ५
न मृगः खलु कोप्ययं जिघांसुः स्खलति ह्यत्र तथा भृशं मनो मे वि
मलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुं वा ६ मुनिरस्मि निराग
सः कुतो मे भयमित्यपि नन्वमत्यभिमानः परवृद्धिषु बद्धमत्सराणां किमिव हि
स्ति दुरात्मनामलंघ्यम् ७ दनुजः स्विदयं क्षपाचरो वा वनजे नेति बलं बत
अस्ति सत्त्वे अभिभूय तथाहि मेघनीलः सकलं कंपयतीव शैलराजं ८ अय
मेव मृगव्यसत्रकामः प्रहरिष्यन्मयि मायया शमस्थे पृथुभिर्ध्वजिनी

मृगयाभिमुखः प्रहर्ता ... अस्मान् जिघांसुः ... करिष्यतीत्यर्थः ३ परिकल्पितत्वेत्यर्थः २
आखेटो मृगव्यं स्यादाखेटो मृगया स्त्रियामित्यमरः
सत्रमाच्छादने यज्ञे सदादाने धनेपीत्यमरः १

३ सर्पितुरस्तस्तनाश्रय। स्वगोत्रबांधवज्ञातिबंधुस्वस्वजनाः समाः इत्यमरः ३

=मायिकः परमार्थिकोवास्तु ५

कि. १३ र वैरकायैश्चकितोद्भ्रान्तमृगाणि काननानि ९ बहुशः कृतसत्कृतेर्विधा

तुं प्रियमिच्छन्नथवा सुयोधनस्य क्षुभितं वनगोचराभियोगाद्गणमाशि

६८ श्रियदाकुलं तिरश्चां १० अवलीढसनाभिरश्वसेनः प्रसभं खाण्डवजातवे

दसा वा प्रतिकर्तुमुपागतः समन्युः कृतवैरोयदिवाहकादरेण ११ बलि

शालितया यथा तथा वा धियमुच्छेदपरामयं दधानः नियमेन मया निबर्ह

णीयः परमं लाभमरातिभंगमाहुः १२ कुरु तात तपांस्यमार्गदायी विजया

येत्यलमन्वशान्मुनिर्मां बलिनश्च वधादृते स्य शक्यं व्रतसंरक्षणमन्यथा

न कर्तुं १३ इति तेन विचिन्त्य चापनाम प्रथमं पौरुषचिह्नमाललंबे उपल

=ननु मुनिर्वा कथमधर्मम ४ =ननु तपो विरोधिनी हिंसेत्याह ३ =रंध्रान्वेषिणां प्रवेशनयच्छन्नित्यर्थः २

=वरगतत्राह २ =तस्यमुख्यायु =हिंसादिदुष्टनिग्रहकरणं धर्मइत्यर्थः २

=वध्यः प्रमाणं निबर्हणं इति ३ =भतादित्यर्थः ९

५

=अर्जुनस्य तु गांडीवं गांडीवो पुन्नपुंसके ४ =अन्यत्र स्वधनं ४ =अनुभावः प्रभावे च सतां च मतिनिश्चये अमरः ९

=तदेव बलं तस्य प्रोक्तं २ अवरुध्यमानं २

=दृढत्वादिदोषरहितः ऋजुः ९

ब्धगुणः परस्य भेदे सचिवः शुद्ध इवाददे च बाणः १४ अनुभाववता गुरुस्थिर

=अन्यत्र प्रतिष्ठित= त्वादविसंवादि धनुर्धनंजयेन स्वबलव्यसनेपि पीड्यमानं गुणवन्मित्रमिवा =औदार्यादिगुण=

=त्वात् असत्यरहितं= नतिं प्रपेदे १५ प्रविकर्षनिनादभिन्नरंध्रः पदविष्टंभनिपीडितस्तदानीं सन्ध्य २

अधिरोहति गांडिवं महेषौ सकलः संशयमारुरोह शैलः १६ ददृशेथ स =बाणसंधानानंतरं ५

विस्मयं शिवेन स्थिरपूर्णायतचापमंडलस्थः रचितस्त्रिसुरारिपुरां विधातुं

=अध्यधिना कि =वधमात्मेव भयानकः परेषां १७ विततकर्षसंहितपुंखैः स्मरणास्कंदनतां

=वानमाह ३ भिताचलेंद्रः धनुरीततनागवासुकिज्यावदनग्रथि भिविमुक्तवह्निशंभुः

१८ सपदि वस्यसमः । वस्यैकहेतोः सितसमेन विधास्यतोः सहार्थौ । =आलिप्तसंप्रसेज्जनं= =अन्यत्रसहार्थं=

संसारोच्छित्तिनिदानस्य ९ करिष्यतोः ९ संभ्रय

किरातस॰ १४ रिपुराशपराभवायमध्यं प्रकृतिप्रत्यययोरिवानुबंधः १९ अथदीपितवारिवा

६९ हवर्त्मारवविवासितवारणादवार्यः निपपातजवादिषुः पिनाकान्महतोभ्रादि

ववैद्युतः कृशानुः २० व्रजतोस्य बृहत्पतत्रजन्मा कृततार्क्ष्योपनिपातवेगशंकः

प्रतिनादमहान्महोरगाणां हृदयश्रोत्रभिदुत्पपातनादः २१ नयनादिवशू

यातीनियन् ४ लिनः प्रवृत्तैर्मनसोप्याशुतरं यतः पिशंगैः विलसद्भिर्विलसत्तडिल्लताभैः किर

कादंबमार्गणशराः णैर्व्योमनि मार्गणस्य मार्गः २२ अपयन्धनुषः शिवांतिकस्थैर्विवरेसद्भिरभि ६८

अजिह्मगाशुगाः ख्ययाजिहानैः युगपद्ददृशे विशन्वराहं तदुपोढैश्च नभश्चरैः पृषत्कः २३ स

इत्यमरः २ तमालनिभे रिपौ सुराणां घननीहार इवाविषक्तवेगः भयविप्लुतमीक्षितो न

=शोभयागच्छन्नित्यर्थः २ — सांद्रतुहिनरव — =अप्रतिषिद्धवेगः — =पृषत्कबाणविशिखा अजिह्मगखगाशुगाः अमरः २

जगती विष्टपे महीवास्तकच्छंदोविशेषयोरिति विश्वः

=शताधिकासंख्यानामित्यर्थः परः शताद्यास्ते येषां परा संख्या शताधिके =शिवबाणपातसमये

स्यमरः ४ — ४ पतत्रिपक्षिपतगपतत्पत्ररथांडजा इत्यमरः ४ — अर्जुनबाणप्रयोगमाह

भःस्थैर्जगतीं ग्राह इवापगां जगाहे २४ सपदिप्रियरूपपर्वलेखः शितलोहा

ग्रमुखः खमाससाद कुपितांतकतर्जनांगुलिश्रीर्व्यथयन्प्राणभृतः कपि

उल्कावद्दीप्यमानमित्यर्थः २ ध्वजेषुः २५ परमास्त्रपरिग्रहोरुतेजः स्फुरदुल्काकृतिविक्षिपन्वनेषु सज ४ गांडीवान्निःसरणं

वेनपतन्परः शतानां पततां व्रात इवारवं वितेने २६ अविभावितनिष्क्रम

प्रयाणः शमितायाम इवातिरंहसा सः सहपूर्वतरं नु चित्तवृत्तेरपतित्वा नु चका

रलक्ष्यभेदं २७ स वृषध्वजसायकावभिन्नं जयहेतुः प्रतिकायमेषणीयं ल

घुसाधयितुं शरः प्रसेहे विधिनेवार्थमुदीरितं प्रयत्नः २८ अविवेकवृथा अंतरानभिज्ञत्वं २

२ निःफलप्रयासः श्रमाविवार्थं क्षयलोभाविव संश्रितानुरागं विजिगीषुमिवानयप्रमादाव

अनुपायः १ — अनुजीविनां — २ भ्रमो विपक्षस्य जयासिद्धिरिति भावः १

१ धनमिव प्रस्थानविघातहेतुत्वादनयोर्धनहानिकरत्वमिति भावः १

=अकिंचित्करस्वामिनि अनुरागस्यानवस्थानादिति भावः १

=संभ्रमस्त्वादरे सपदिविस्मयः= शिवार्जुनयोः=

करणशैथिल्यं= नीतवंतौ पारिश्वान्तित्यर्थः

किरा१२ वसादविशिरैर्वचोभिर्निनिन्युतुस्ते २९ अथदीर्घतरंतमः प्रवेक्ष्यन्सहसाभग्नरयः

पतन पादितपाषाणः

७० ससंभ्रमेण निपतन्तमिवोष्णरश्मिमुर्व्यांवलयीकृततरुंधरांचमेने ३० स

क्षितौगतं गतः क्षितिमुष्णशोणिताद्रैः खुरदंष्ट्राग्रनिपातदारिताश्मा असुभिः क्ष

स्वार्थरोषाहिति भावः४ णमीक्षितेन्द्रसूनुर्विहितामर्षगुरुध्वनिर्निरासे ३१ स्फुटपौरुषमासस्पा

प्रभूतशरः

वराहपातानंतरं४ र्थस्तमथप्राज्यशरः शरंजिघृक्षुः नतथाकृतवेदिनांकिरातान्प्रियता क्षतज्ञानां४

कृतज्ञानां अध्ययुम्भनाह नीच

मीतियथाकृतिविदान्ः शूरः उपकारइवासनिःप्रयुक्तः स्थितमप्राप्यमृगे

अबद्धपनंकत्त्वहित्वं गतःप्रणाशं। कृतवान्किरथोमुखेणगुरुख्यं ङ्कानितत्रीडइवात्मपौरुषेण ७०

इत्यमरः३ अनुपु

३३ ससमुद्धरतावितिर्यतेनस्वरुरीकृतिमिवोत्तमाद्यानः

सर्वथायाह्यमिति विस्मयः =इषुरिवआदातव्यथाप्रतीयतइत्यर्थः

कृतपौरुषः२

=प्रभूतंप्रचुरंप्राज्यमदभ्रंबहुलंबहु अमरः४

स्वर्वार्तिस्यपाटवं। वार्तंपाटवमारोग्यंभव्यंस्वास्थ्यमनामयमितियादवः

=आलिंगितवंतः किरातिनामादरेणइत्यर्थः

करयस्त्ववातमुखैःपरिरेभेनुभूर्ध्वविलोचनाभ्यां ३४ युग्म तनका इतःप्रभृतिनरथोद्धता वृत्तं

मुकथरंमहाभुजःपश्यातिस्पसहसावनेचरं संनिकाशयितुमग्रतःस्थि

मदन

तशासनंमकरकेतुविद्विषः ३५ सप्रयुज्यतनयमहीपतेरात्मजातिसे

विश्वासं

हृशांकिलानतिं सांत्वपूर्वमभिनीतिहेतुकंवक्तुमित्थमुपचक्रिरेवचः क्रमे४

तत्रतावतनुर्लिःसां त्वमाह४ ३६ शांततांविनयोगिमानसंसौर्यमविमलंतपःश्रुतं प्राहते श्रेतेवल४

दिविस्वर्गतिरक्षवि

नुसदृशींदिवौकसामन्ववायसदृशीमवतदीमाकृतिः ३७ दीपितस्त्व

मनुभावसंपदागौरवेणलघयन्महीभृतः राजसेमुनिरपीहधारयन्नाधि

इन्द्रसम्बन्धं पत्यमिवशातमन्यवं ३८ तापसोपिविभुतामुपयिवानाश्रयस्त्वमसि

अनौद्धत्यनघतायुक्तं४ =वंशोन्ववायःसंतानः अमरः२ ऐश्वर्यरहितोपि इत्यर्थः२

किरा॰स॰१३ सर्वसंपदः दृश्यते हि भवतो विना जनैरन्वितस्य सचिवैरिव द्युतिः ३९
विस्मयः क इव वा जयश्रिया नैव मुक्तिरपि ते दवीयसी ईप्सितस्य न भवेदुपा
७१
श्रयः कस्य निर्जितरजस्तमोगुणः ४० ह्रेपयन्नहिमतेजसं त्विषा स्व
मित्थमुपपन्नपौरुषः हर्तुमर्हसि वराह मोदनं नैवमस्मदधिपस्य सायकं सत्पुरुषमन्वाहेति
अनर्हत्वमेवाह ५
४१ स्मर्यते तनुभृतां सनातनं न्याय्यमाचरणमुत्तमैर्नृभिः ध्वंसते य
महापुरुषाद्
दि भवादृशस्ततः कः प्रयातु वद तेन वर्त्मना ४२ आकुमारमुपदेष्टुमिच्छ ७१
अपमार्गे महानर्थहेतोः आत्मज्ञानमहिम्ना
वः संनिवृत्तिमपथान्महापदः योगशक्तिजितजन्ममृत्यवः शीलयंति अभ्यस्यंति
सत्पादयन्
मुनयः सुशीलतां ४३ तिष्ठतां तपसि पुण्यमासजन्त्संपदोनुगुणयन्सुखै सुखसाधनमतां
सद्वृत्ततां। शीलं स्वभावे सद्वृत्ते अमरः तपोनिष्ठानां धर्मार्थिनामित्यर्थः अनुकूलयन्
धनहानिः किंत्वर्थप्राप्तिरपीत्याह

अथवा किं भवादृशोऽन्यसंभावनया यद्भ्रांतिरपि सं
२ अत्यन्तमनुकरोतीत्यर्थः भाव्यते निस्वशक्तिमवलंबते
कुमार्गे अपहरणरूपे
रूपेण रक्षादिना सर्वथा प्रिय एव चतुर्वर्गसाधनत्वादित्यर्थः
सुखार्थिनां सौहित्यं
षिणां योगिनां परिणमन्विमुक्तये केन नास्तु विनयः सतां प्रियः ४४ नू
नमत्रभवतः शराकृतिं सर्वथायमनुयाति सायकः सोयमित्यनुपपन्नसंश
मिथ्याभिनेः आश्रित्य
यः कारितस्त्वमपथे पदं यया ४५ अन्यदीयविशिखेन केवलं निस्पृहस्य
भवितव्यमाहते निघ्नतः परनिबर्हितं मृगं व्रीडितव्यमपि ते सचेतसः ४६
संततं निशमयंत उत्सुका यैः प्रयान्ति मुदमस्य सूरयः कीर्तितानि हसितेपि
तानि यं व्रीडयंति चरितानि मानिनं ४७ अन्यदोषमिव सस्वकं गुणं ख्या
पयेत्कथमधृष्टताजडः उच्यते स खलु कार्यवत्तया धिग्विभिन्नबुधसेतुम
र्थितां ४८ युग्मं ऊर्जितं तदथ मास्म भून्मृगस्त्वय्यसौ यदकरिष्यदोज

पुनः विस्मयमेवाह [illegible]

अथास्मिन्कृतमृताभियोगाय स्वोपकारत्वं वर्णयित्वा विकत्थनदोषं मावधुर्मेनाह ४

नाभियुंजीत

किरा.स.१३ सा नैमेन भुवि यद्वाहिनीपतिः प्रजप त्स्यतशितेन पत्रिणा ४९ कोन्विमं

७२ हरितुरंगमायुधस्थेयसीं दधतमंगसंहतिं वेगवत्तरमृते चमूपतेर्हंतुमर्हति शर ति

रेण दंष्ट्रिणं ५० मित्रमिष्टमुपकारिसंश्रये मेदिनीपतिरयं तथा च ते तं विरोध्य

भवता निरासि मा सज्जनैकवसतिः कृतज्ञता ५१ लभ्यमेकसुकृतेन दुर्ल

भा रक्षितारमसुरक्ष्यभूतयः स्वंतमंतविरसा जिगीषतां मित्रलाभमनुला

भसंपदः ५२ चंचलं वसु नितांतमुन्नता मेदिनीमपि हरंत्यरातयः भूधरस्थि ७२

रमुपेय मागतमावमंस्त सुहृदं महीपतिं ५३ युग्मं जेतुमेवमवता तपस्य

तेना युधानि दधते मुमुक्षवः प्राप्यते च सकलं त्वया कृता संगतेन तपसः फ

अभ्याख्यानं मिथ्याभियोगो भ्याख्यानमित्यमरः

लं त्वया ५४ वाजिभूमिरिभराजकाननं संति रत्ननिचयाश्च भूरयः कां

चनेन किमिवास्य पत्रिणा केवलं न सहते विलंघनं ५५ सावलेपमुपलिप्सिते

परैरभ्युपैति विकृतिं रजस्यपि अर्थितस्तु न महान्समीहते जीवितं किमुत ध

नं धनायितुं ५६ तत्तदीयविशिखातिसर्जनादस्तु वा गुरु यदृच्छयागतं

राघवप्लवगराजयोरिव प्रेमयुक्तमितरेतराश्रयं ५७ नाभियोक्तुमनृतं

त्वमिष्यसे कस्तपस्विविशिखेषु चादरः संति भूभृति शरा हि नः परे ये परा

मवसूनि वज्रिणः ५८ मार्गणैरथ तव प्रयोजनं नाथसे किमु पतिं न भूभृ

तः त्वद्विधं सुहृदमेत्य सोर्थिनं किं न यच्छति विजित्य मेदिनी ५९ ते

प्रबलः प्रियो वा परस्य धनं स्वयं गृह्णाति २
अर्थः २

अतस्त्वया वितापसत्वादाकं विक्रस्यते नैव सहसस्येमनसुखस्यमितिभावः ५

अथनास्त्यास्त्रसंपत्त्यासाक्षात्पिप्राः

विद्वान् २ स्वजनः १ पुंसः ३ ननु स्वयं ग्राहिणः किं याच्ञयेत्यतआह — स्वाम्यनुज्ञां विना ग्रहणं २ नतत्राह २

सामर्थ्ये २ क्रियते

कारणेन उपकारत्वमात्रधनः

किरा॰ स॰ १३ नसूरिरुपकारितां धुनः कर्तुमिच्छति नयाचितं यथा सीदतामनुभवन्निवार्थिनां अपराधेपिच विकारि २

वैदग्ध्येन ६२ वेदयः प्रणयभंगवेदनां ६० शंकिरर्थपतिषु स्वयं यदहं प्रेमकारयति वानिरस्य

अन्यथा दोषमाहयं कारणद्वयमिदं निरस्यतः प्रार्थनाधिकफले विपत्फले ६१ अस्त्रवेदम

धिगम्य तत्त्वतः कस्य चेह भुजवीर्यशालिनः जामदग्न्यमपहाय गीयते ताप

सार्थकं ४ सेषु चरितार्थतायुधं। ६२ अभ्ययानि मुनिचापलात्त्वयायन्मृगः क्षितिपतेः अथ तस्य ... नमु... २

परिग्रहः परिजनेप परिग्रहः अक्षमिष्ट तदयं प्रमाद्यतां संवृणोति खलु दोषमज्ञता ६३ जन्मवेष

स्वीकारमलपा तपसां विरोधिनीं मा कृथाः पुनरमूमपक्रियां आपदेत्युभयलोकदूषिणी

प्रतिविरव ३ वर्तमानमपथे हि दुर्मतिं ६४ यष्टुमिच्छसि पितॄन्न सांप्रतं न त्वमर्चयिषुर्

ननु पुष्पमार्गणशारद्वोहिणः तवतत्कथंसख्यंस्यादित्यात्रोकोसोयंतप पितावन्मृगवधापराधं क्षमिष्यतर इत्यत्राह ४

= अत्राकस्यात्प्रियस्य वसतः प्रबलकथनग्रहणं फणिशिरोमणिग्रहणसाहसवदनर्थायकल्पत इत्यर्थः ६

वौकसः दातुमेव पदवीमसि क्षमः किं मृगं न विशिखं न्यवीविशः ६५ सज्ज

नोसि विजहीहि चापलं सर्वदा क इव वा सहिष्यते वारिधीनिव युगांतवायवः

क्षोभयंत्यनिभृता गुरूनपि ६६ अस्त्रवेदविदयं महीपतिः पार्वतीय इति

वनजीगणः गोपितुं भुवमिमां मरुत्वता शैलवासमनुनीय लंभितः ६७

तत्तितीक्षितमिदं मया मुनेरित्यवोचत वचश्चमूपतिः बाणमत्र भवते निजं

दिशन्नाप्नुहि त्वमपि सर्वसंपदः ६८ आत्मनीनमुपतिष्ठते गुणाः संभवं

ति विरमंति चापदः इत्यनेकफलभाजि मा स्म भूदर्थिता कथमिवार्यसंग

मे ६९ हन्यतामयमनोकहांतरे तिग्महेतिपृतनाभिरन्वितः साहिवी

कि.रा. सतरे विरिवसिंधुरुद्धतो भूपतिः समयसेतुवारितः ७० सज्जं धनुर्वहति योहि
७४ पतिस्थवीयः सञ्छ्याकर्यहरितुरंगमकेतुलक्ष्मीं। अस्यानुकूलय मतिं मतिम
न्ननेन सख्या सुखान्यधिगमिष्यसि वंचितानि ७१ छ. इति श्रीकि
रातार्जुनीये महाकाव्ये लक्ष्म्यंके कैतारविकृतौ मूकदानववधो नाम त्रयो
किरातवाक्यानंतरं दशः सर्गः १३॥ श्रीः ततः किरातस्य वचोभिरुद्धतैः पराहतः शैल इवार्णवां जगलैः४
निर्विकारत्वं२ बुभिः जहौ न धैर्यं कुपितोपि पांडवः सुदुर्ग्रहांतःकरणा हि साधवः १ सलक्षमु ७४
ल्लिंगितशात्रवेंगितः कृती गिरां विस्तरतत्त्वसंग्रहे स्वयं प्रमाणीकृतकालसा प्रधानीकृतं२
क्षोभरहितः१ धनः प्रशांतसंरंभ इवाददे वचः २ विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयं

सात्वहर्षवंतावपराह २
लिंगैस्तद्धाकारैरिंगितैरिव सम्यगवगतमित्यर्थः २ संयोगादिना श्लिष्टाः २
प्रयाहउवाचेत्यर्थः २
वर्णा द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाक्षरे २

९

ती हृदयान्यपि द्विषां प्रवर्तितेनाकृतपुण्यकर्मणा प्रसन्नगंभीरपदा सरस्वती
३ प्रवर्तितसश्यतमाविपश्चितां मनोगतं वा विनिवर्तयंति ये नयंति ते ष्व
प्युपपन्ननैपुणा गंभीरमर्थं कतिचित्प्रकाशतां ४ स्तुवंति गुर्वीमभिधेयसं
पदं विशुद्धिमुक्तेरपरे विपश्चितः इति स्थितायां प्रतिपूरुषं रुचौ सुदुर्लभाः स
र्वमनोरमा गिरः ५ समस्य संपादयता गुणैरिमां त्वया समारोपितभारभा
रती प्रगल्भमात्मा धुरि धुर्यसंसदां वाग्मिनां वनेचरेणापि सता विरोधिवि
तः ६ प्रयुज्य सामाचरितं विलोभनं भयं विभेदाय धियः प्रदर्शितं तथाभि
युक्तं च शिलीमुखार्थिना यथेतरन्न्याय्यमिवावभासते ७ विरोधिसि ततः किमताह २

निवारणे हेतुमाह

फलस्य प्रैषणिनिमान नियमस्य

किरा० स० १४ दूरीतिकर्तुमुद्यतः स वारितः किं भवता न भूपतिः हितेनियोज्यः खलुभूतिमि इहामुत्रश्रेयार्थिना

७५ च्छतासहार्थनाशेननृपोऽनुजीविना ८ ध्रुवं प्रणाशः प्रहितस्य पत्रिणः शिलो

च्चयेतस्यविमार्गणंनयः नयुक्तमत्रार्यजनातिलंघनंदिशत्यपायंमहतामप

क्रमः ९ अतीतसंख्याविहिताममाग्निनाशिलीमुखाः खाण्डवमत्तुमिच्छ

ता अनादृतस्यामरसायकेष्वपिस्थिताकथंशैलजनाशुगेधृतिः १० य

दिप्रमाणीकृतमार्यचेष्टितंकिमित्यदोषेपितिरस्कृतावयं अयातपूर्वा

परिवादगोचरंसतांहिवाणीगुणमेवभाषते ११ गुणापवादेनतदन्यरो ७५

पणैर्भृशाधिरूढस्यसमंजसंजनं द्विधेवकृत्वाहृदयंनिगूहतः स्फुरन्न

विस्तरेतो

साधोर्विवृणोतिवागसिः १२ वनाश्रयाः कस्यमृगाः परिग्रहाः शृणाति

यस्तान्प्रसभेनतस्यते प्रहीयतामत्रनृपेणमानितानमानिताचास्तिभवं

तिवश्रियः १३ नवल्मकस्याद्यदपिप्रदीयतामितिव्रतंमेविहितंमहर्षिणा

जिघांसुरस्मान्निहितोमयामृगोव्रताभिरक्षाहिसतामलंक्रिया १४ मृ

गान्विनिघ्नन्मृगयुःस्वहेतुनाकृतोपकारःकथमिच्छतांतपः तथापिनेद

स्कृमृगः सनः सुणादृतेनपूर्वनमयेनकागतिः १५ अनायुधेसत्वजि

घांसितेमुनौकृपेतिवृत्तिर्महतामकृत्रिमा शरासनंबिभ्रतिसज्यसा

यकंकृतानुकंपः सकथंप्रतीयते १६ अथोशरस्तेनमदर्थमुज्झितः फलं

किरातस० १४ हितस्य प्रतिकार्यसाधनं अविक्षितेतत्रमयात्मसात्कृते कृतार्थतानन्वधिका
७६ चमूपतेः १७ यदात्थ कामं तव तास याच्यतामिति क्षमं नैनदनल्पचेतसां
कथं प्रसह्याहरणैषिणां प्रियाः परावनत्या मलिनीकृताः श्रियः १८ अभूत
मासज्य विरुद्धमीहितं बलादलभ्यं तव लिप्सते नृपः विजानतोपि ह्यनयस्य
रौद्रतां भवत्यपाये परिमोहिनी मतिः १९ अस्त्रिः शरा वर्म धनुश्च नोच्चकै
र्विविच्य किं प्रार्थितमीश्वरेण ते अथास्ति शक्तिः कृतमेव याच्ञया न दू ७६
षितः शक्तिमतां स्वयंग्रहः २० सखा स युक्तः कथितः कथं त्वया यदृच्छया
सूयति यस्तपस्यते गुणार्जनोच्छ्राय विविक्तबुद्धयः प्रकृत्समित्राहित

तामसाधवः २२ वयं क्व वर्णाश्रमरक्षणोचिताः क्व जातिहीना मृगजीवितच्छि
दः सहापकृष्टैर्महतां न संगतं भवंति गोमायुसखा न दंतिनः २३ परोवजा
नाति यदज्ञताजडस्तदुन्नतानां न विहंति धीरतां समानवीर्यान्वयपौरु
षेषु यः करोत्यतिक्रांतिमसौ तिरस्क्रिया २३ यदा विगृह्णाति हतं तदा यशः
करोति मैत्रीमथ दूषिता गुणाः स्थितिं समीक्ष्योभयथा परीक्षकः करोत्यव
ज्ञोपहतं पृथग्जनं २४ मया मृगान्हंतुरनेन हेतुना विरुद्धमाक्षेपवचस्तितिक्षि
तं शरार्थमेष्यत्यथ लप्स्यते गतिं शिरोमणिं दृष्टिविषाज्जिघृक्षतः २५
इतीरिताकूतमनीलवाजिनं जयाय दूतः प्रतितर्ज्य तेजसा ययौ समीप
दुरभिप्राय

ध्वजीनींसमीयुषः प्रसन्नरूपस्याविकल्पचक्षुषः २६ ततोपवादेनपताकि
नीपतत्स्वचालनिह्रादवतीमहाचमूः युगान्तवाताभिहतेवकुर्वतीनिनाद
मंभोनिधिवीचिसंहतिः २७ रणायजैत्रःप्रदिशन्निवत्वरांतरंगितालंबि
तकेतुसंहतिः पुरोबलानांसघनांबुसीकरःशनैःप्रतस्थेसुरभिः समीर
णः २८ जयारवक्ष्वेडितनादमूर्छितःशरासनज्यातलवारणध्वनिः
असंभवन्भूधरराजकुक्षिषुप्रकंपयन्गामिवतस्तरेदिशः २९ निशात
रौद्रेषुविकासतांगतैःप्रदीपयद्भिःककुभामिवांतरं वनाद्दाहेतिषुभिन्न
विग्रहैर्वपुस्फुरद्रश्मिभिवतांमरीचिभिः ३० उदूढवक्षःस्थगितैकदिङ्मुखो

विकृष्टविस्फारितचापमंडलः वितत्यपक्षद्वयमायतंबभौविभुर्गुणाना
मुपरिवमध्यगः ३१ समेषुदुर्गेषुवतुल्यविक्रमैर्जवादहंपूर्विकयायियासु
भिः गणैरविच्छेदनिरुद्धमाबभौवनंनिरुच्छ्वासमिवाकुलाकुलं ३२ ति
रोहितश्वभ्रनिकुंजरोधसःसमश्नुवानाःसहसातिरिक्ततां किरातसै
न्यैरपिधायरेचिताभुवःक्षणान्निम्नतयेवभेजिरे ३३ पृथूरुपर्यस्तबृ
हल्लतातातिर्जवानिलाघूर्णितशालचंदना गणाधिपानांपरितःप्रसा
रिणीवनान्यवांचीवचकारसंहतिः ३४ ततःसदर्पंप्रतनुंतपस्ययामद
स्रुतिक्षाममिवैकवारणं परिज्वलंतंनिधनेनावृद्विषांददर्शतमारादिव

कि०१४ जातवेदसं ३५ अनादरोपात्तधृतैकमार्गणंजयेनुकूलेसुहृदीवमार्गणे।
७८ शनैरपूर्णप्रतिकारपेलवेनिवेशयंतंनयनेबले। धीरं ३६ निषंगमाप
न्नतिकारकारणेशरासनेधैर्यइवानपायिनि अलंघनीयंप्रकृताव
स्थितंनिवातनिष्कंपइवापगापतिं ३७ उपेयुषीविभ्रतमंतक
द्युतिंवधाद्दूरेपाततस्यपत्रिणः पुरःसमावेशितसत्त्वमुद्धिजेः
पतिंपशूनामिवहूतमध्वरे ३८ निजेननीतंविजितान्यगौरवंग ७८
भीरतांधैर्यगुणेनभूयसा। वनोदयेनेवघनोरुवीरुधांसमंधकारी
कृतमुत्तमाचलं ३९ महर्षभस्कंधमनूनकंधरंबृहच्छिलावप्रघनेन

वक्षसा। समुज्जिहीर्षुंजगतींमहाभरांमहावराहंमहतोर्णवादिव ४०
हरिन्मणिश्याममुदग्रविग्रहंप्रकाशमानंपरिभूयदेहिनः मनुष्यभा
वेपुरुषंपुरातनंस्थितंजलार्द्रमिवांशुमालिनं ४१ गुरुक्रियारंभफ
लैरलंकृतंगतिंप्रतापस्यजगत्प्रमाथिनः गणाःसमासेदुरनीलवा
जिनंमहावलंतोयघनाघनाइव ४२ कुलकं यथास्वमाशांसित
विक्रमाःपुरामुनिप्रतापक्षततेजसःपरे ययुः क्षणादप्रतिपत्तिमू
ढतांमहापन्निभावःप्रतिहतिपौरुषं ४३ ततःप्रजज्ञेसममेवतत्र
तैरपेक्षितान्योन्यबलोपपत्तिभिः महोदयस्यापिहिसंघट्टितो

 सहायसाध्याः प्रदिशंति सिद्धयः ४४ किरातसैन्यादुरुचापनोदिताः
७९ समं समुत्पेतुरुपात्तरंहसः महावनादुन्मनसः खगा इव प्रवृत्तपत्रध्वन
यः शिलीमुखाः ४५ गभीररंध्रेषु भृशं महीभृतः प्रतिस्वनैरुन्नमिते
न सानुषु धनुर्निनादेन जवादुपेयुषा विभिद्यमाना इव दध्वनु
र्दिशः ४६ विधूनयंती गहनानि भूरुहां तिरोहितोपांतनभोदिगं
तरा महीयसी वृष्टिरिवानिलेरिता रवं वितेने गणमार्गणावलिः ७५
४७ त्रयीमृतूनामनिलाशिनः सतः प्रयाति पोषं वपुषि प्रहृष्यतः र
णाय जिष्णोर्विदुषेव सत्वरं घनत्वमीये शिथिलेन वर्मणा ४८ प

तत्सु शस्त्रेषु वितत्य रोदसी समंततस्तस्य धनुर्दुधूषतः सरोषमुल्के
व पपात भीषणा बलेषु दृष्टिर्विनिपातशंसिनी ४९ । दिशः समूहन्नि
व विक्षिपन्निव प्रभां रवेराकुलयन्निवानिलं मुनिश्चचाल क्षयका
लदारुणः क्षितिं सशैलां चलयन्निवेषुभिः ५० विमुक्तमाशंसितशत्रु
निर्जयैरनेकमेकावसरं वनेचरैः स निर्जघानायुधमंतरा शरैः क्रियाफलं
काल इवातिपातितः ५१ गतैः परेषामविभावनीयतां निवारयद्भिर्वि
पदं विदूरगैः भृशं बभूवोपचितो बृहत्फलैः शरैरुपायैरिव पांडुनंदनः ५२
दिवः पृथिव्याः ककुभां नु मंडलात्पतंति बिंबादुत तिग्मतेजसः सकृद्वि

कि० स० १४ क्षणाद्वियत्कार्मुकान्मुनेः शराः शरीरादितितेभिमेनिरे ५३ (द्विषांक्षती
८० याः प्रथमे शिलीमुखा विभिद्य देहावरणानि च) गणाधिपानामविधा
य निर्गतैः परासुतां मर्मविदारणैरपि जवादतीये हिमवानधोमुखैः
कृतापराधैरिव तस्य पत्रिभिः ५४ द्विषांक्षतीर्याः प्रथमे शिलीमुखा
विभिद्य देहावरणानि चक्रिरे न तासु पेते विशिखैः पुनर्मुनेररुन्तुदत्व
महतां ह्यगोचरः ५५ समुज्झिता यावदराति निर्यती सहैव चापान्मुनि
बाणसंहतिः प्रभा हिमांशोरिव पंकजावलिं निनाय संकोचमुमापते ८०
श्चमूं ५६ अजिह्ममोजिष्ठममोघमक्लमं क्रियासु बह्वीषु पृथङ्नियो

योजितं प्रसेहिरे साधयितुं न सादिताः शरौघमुत्साहमिवास्य विद्विषः
शिवध्वजिन्यः प्रतियोधमग्रतः स्फुरन्तमुग्रेषुमयूखमालिनं तमेकदे
शस्थमनेकदेशगा निदध्युरर्कं युगपत्प्रजा इव ५८ मुनेः शरौघेण तदु
ग्ररंहसा बलं प्रकोपादिव विष्वगायता विधूनितं भ्रान्तिमियाय संगि
नीमहानिलेनेव निदाघजं रजः ५९ तपोबलेनैष विधाय भूयसीस्त
नूरदृश्याः स्विदिषून्निरस्यति अमुष्य मायाविहतं निहन्ति नः प्रतीपमा
गत्य किमु स्वमायुधं ६० हृता गुणैरस्य भयेन वा मुनेस्तिरोहिता स्वि
त्प्रहरंति देवताः कथं न्वमी संततमस्य सायका भवन्त्यनेके जलधेरिवो

कि॰ स॰ १४ मेयः ६१ जयेन कच्चिद्विरमेदयं रणाद्भवेदपि स्वस्ति चराचराय वा तता
८१ पकीर्णा नृपसूनुमार्गणैरिति प्रतर्ककुलिता पताकिनी ६२ विशंकमर्षिणा
क्षत्यमिषः समाश्रयं महाहवे तेनेव हितं प्रियं वचः बलीयसा तद्विधिनेव
पौरुषं बलं निरस्तं न रराज जिष्णुना ६३ प्रतिदिशं प्लवगाधिपल
क्ष्मणा विशिखसंहतितापितमूर्तिभिः रविकरग्लपितैरिव वारिभिः
शिवबलैः परिमंडलता दधे ६४ प्रवितत शरजालछन्नविश्वांत
राले विधुवति धनुराविर्मंडलं पांडुसूनौ कथमपि जयलक्ष्मी भीत ८१
भीता विहातुं विषमनयनसेना पक्षपातं विषेहे ६६ ॥

इति किरातार्जुनीये महाकाव्ये भारविकृतौ गणयुद्धनाम चतुर्दशः सर्गः १४

अथ भूतानि वार्त्रघ्नशरेभ्यस्तत्र तत्रसुः भेजे दिशः परित्यक्तमहेष्वासा
च सा चमूः १ अपश्यद्भिरिवेशानं रणान्निववृते गणैः मुह्यत्येव हि कृच्छ्रेषु सं
भ्रमज्वलितं मनः २ खंडिताशंसया तेषां पराङ्मुखतया तया आविवेश
कृपा केतौ कृतोच्चैर्वानरं नरं ३ आस्थामालंब्य नीतेषु वशं क्षुद्रेष्वरातिषु
व्यक्तिमायाति महतां माहात्म्यमनुकंपया ४ स सासिः सासुसूः सासो येया
येयाययायः ललौ लीलां ललोलोलः शशीशशिशुशीः शशन् ५ ए
कव्यंजनपादः त्रासजिह्मं यतश्चैनान्मंदमेवान्वियाय सः नातिपीडयितुं

कि·स·१५ भग्नानिर्भर्त्सीहिमहौजसः ६ अथाग्रेहसतासाचिस्थितेनस्थिरकीर्ति
ना सेनान्यातेजगदिरेकिंचिदायस्तचेतसा ७ निरासव्यः माविहासिष्ट
समरंसमरंतव्यसंयतः क्षतंक्षुण्णासुरगणैरगणैरिवकिंयशः ८ पदांत
यमकं विवस्वदंशुसंश्लेषद्विगुणीकृततेजसः अमीवोमोघमुद्गीर्णाहसं
तीवमहासयः ९ वनेवनेवनसदांमार्गंमार्गमुपेयुषां बाणैर्बाणैःसमास
क्तंशंकेशंकेनशाम्यति १० पातितोत्तुंगमाहात्म्यैःसंहतायतकीर्तिभिः ८२
गुर्वींकामापदंहंतुंकृतमावृत्तिसाहसं ११ नासुरोयंनवानागोधरासंस्थो
नराक्षसः नासुखोयंनवाभोगोधरणिस्थोहिराजसः १२ गोमूत्रिकामुरजबंधः

मंदमस्यन्निषुलतांघृणयामुनिरेषवः प्रणुदत्यागतावज्ञंजघनेषुपशूनिव
१३ ननोननुन्नोनुन्नोनोनानानानाननानानु नुन्नोनुन्नोननुन्नेनो
नानेना नुन्ननुन्ननुत् १४ वरंकृतध्वस्तगुणादत्यंतमगुणःपुमान् प्रकृ
त्याह्यमणिःश्रेयान्नालंकारश्च्युतोपलः १५ स्यंदनानोचतुरगाःसुरेभावावि
पत्तयः स्यंदनानोचतुरगाःसुरेभावाविपत्तयः १६ समुद्गकः भवद्भि
रधुनारातिपरिहापितपौरुषैः ह्रदैरिवार्कनिष्पीतैःप्राप्तःपंकोदुरुत्तरः १७
वेत्रशाककुजेशैलेलेशैजेकुकशात्रवे यातांकिंविदिशोजेतुंतुंजेशोदि
विकिंतया १८ प्रतिलोमानुलोमार्द्धः अयंवःक्लैब्यमापन्नान्दृष्टपृष्ठान्

कि॰ स॰ १५ रातिना वांछतीशम्भ्युतावारान्दारानिव निगोपितुं १९ ननुहोमथनारा
८३ घोघोरानाथमहोनुन नयदातवदाभीमामाभीदाबतदायत २० प्रति
लोमानुलोमार्द्धः किंत्यक्तापास्तदेवत्वमानुष्यकपरिग्रहैः ज्वलितान्यगु
णैर्गुर्वीस्थितातेजसिमानिता २१ निशितासिरतोभीकोन्येजतेमर
णारुचा सारतोनविरोधीनस्वाभासोभरवानुत २२ ननुवारभसो
भास्वानधीनोविनतोरसा चारुणारमतेजन्येकोभीतोरसिताशिनि
२३ प्रतिलोमानुलोमार्द्धश्लोकद्वयं निर्भिन्नपातिताश्वीयनिरू ८३
ढरथवर्त्मनि हतद्वीपनगष्ठ्युतरुधिरांबुनदाकुले २४ देवाकानिनि

कावादेवाहिकास्वस्वकाहिवा काकारेभभरेकाकानिस्वभव्यव्यभ
स्वनि २५ सर्वतोभद्रः प्रन्तशावविद्रास्ततुरगाक्षिप्रसारथौ मारु
तापूर्णतूणीरविकृष्टहतसादिनि २६ ससत्वरतिदेनित्यंसदरामर्ष
नाशिनि त्वराधिककसन्नादेरमकत्वमकर्षति २७ अर्द्धभ्रमकः
आसुरेलोकवित्रासविधायिनिमहाहवे युष्माभिरुन्नतिंनीतंनिरस्त
मिहपौरुषं २८ कुलकं इतिशासतिसेनान्यांगछतस्ताननेकधा निषि
ध्यहसताकिंचित्तस्थेतत्रांधकारिणा २९ निरोधः मुनीषुदहनातप्तांल्ल
ज्जयाविनिवृत्सतः शिवःप्रह्लादयामासतान्निषेधहिमांबुना ३०

कि॰१५ नास्तेरिवलाहूनानिरेमाबकुमेनिरे भीताःशितशराभीताःशंकरंतत्रशंक
८४ रं ३१ आद्यंतयमकं महेषुजलधौशत्रोर्वर्तमानादुरुत्तरे प्राप्यपारमिव
ध्यानमानरवासपताकिनी ३२ सबभाररणापेतांचमूंपश्चादवस्थितां
पुरःसूर्यादुपावृत्तांछायामिवमहातरुः ३३ मुंचतीशेशरांजिष्णौपिना कि॰ ४
कस्वनपूरितः दध्वानध्वनयन्नाशाःस्फुटन्निवधराधरः ३४ तद्गणाद
दृशुर्भीमंचित्रसंस्थाइवाचलाः विस्मयेनतयोर्युद्धंचित्रसंस्थाइवाचलाः ८४
३५ अंतयमकं परिमोहयमाणेनशिक्षालाघवलीलया जैष्णवीविशि
खश्रेणीपरिजह्रेपिनाकिना ३६ अवद्यन्पत्रिणःशंभोःसायकैरवसा

यकैः पांडवःपरिचक्रामशिक्षयारणशिक्षया ३७ चारचंचुश्चिरारेचिचं
चच्चीररुचारुचः चचाररुचिरश्चारुचारैराचारचंचुरः ३८ स्फुरत्पि
शंगमौर्वीकं धुन्वानःसद्दृढंधनुः धृतोल्कानलयोगेनतुल्यमंशुमताब
भौ ३९ पार्थबाणाःपशुपतेरावव्रुर्विशिखावलिं पयोमुचइवारंध्राः
सावित्रीमंशुसंहतिं ४० शरवृष्टिंविधूयोर्वीमुदस्तांसव्यसाचिना
रुरोधमार्गणैर्मार्गंतपनस्यत्रिलोचनः ४१ तेनव्यातेनिरेभीमाभीमा
र्जुनफलाननाः ननानुकंप्यविशिखाःशिखाधरजवाससः ४२ द्यु
वियद्गामिनीतारसंराववितितश्रुतिः हैमीषुमालाशुशुभेविद्युतामि

कि॰स॰१५
८५
वसंहतिः ४३ त्रिषुचरणेषुगुरुश्चतुर्थपादः विलंघ्यपत्रिणांपंक्तिंभिन्नःशि
वशिलीमुखैः ज्यायोवीर्यंसमाश्रित्यनचकंपेकपिध्वजः ४४ जगतीश
रणेयुक्तोहरिकांतःसुधासितः दानवर्षीकृताशंसोनागराजइवाबभौ ४५
अर्थत्रयवाची विफलीकृतयत्नस्यक्षतबाणस्यशंभुना गांडीवधनु
षःखेभ्योनिःपपातहुताशनः ४६ सपिशंगजटावलिःकिरन्नुरुतेजःप
रमेणमन्युना ज्वलितौषधिजातवेदसाहिमशैलेनसमंविदिद्युते ४७ ८५
शतशोविशिखानवद्यतेभृशमस्मैरणवेगशालिने प्रथयन्ननिवार्य
वीर्यतांप्रजिघायेषुमघातुकंशिवः ४८ शंभोर्धनुर्मंडलतःप्रवृत्तंतंमंडला

दंशुमिवांशुभर्तुः निवारयिष्यन्विदधेसिताश्वःशिलीमुखच्छायवृतां
धरित्रीं ४९ घनंविदार्यार्जुनबाणपूगंससारबाणोयुगलोचनस्य घनं
विदार्यार्जुनबाणपूगंससारबाणोयुगलोचनस्य ५० रुजन्महेषून्ब
हुधाशुपातिनोमुहुःशरौघैरपवारयन्दिशः चलाचलोनेकइवक्रियावशा
न्महर्षिसंघैर्बुबुधेधनंजयः ५१ विकाशमीयुर्जगतीशमार्गणाविका
शमीयुर्जगतीशमार्गणाः विकाशमीयुर्जगतीशमार्गणाविकाशमीयु
र्जगतीशमार्गणाः ५२ पंक्तियमकं संपश्यतामितिशिवेनवितायमा
नंलक्ष्मीवतःक्षितिपतेस्तनयस्यवीर्यं अंगान्यभिन्नमपितत्वविदांमु

कि॰१६ नीनांरोमांचमंचिततरंबिभरांबभूवुः ५३ ॥ इति श्रीकिरातार्जु
८६ नीयेमहाकाव्येलक्ष्म्यंकेभारविकृतौशिवार्जुनयुद्धंनामपंचदशःसर्गः
श्रीः ततःकिराताधिपतेरलघ्वीमाजिक्रियांवीक्ष्यविवृद्धमन्युः स
तर्कयामासविविक्ततर्कश्चिरंविचिन्वन्निति कारणानि १ मदस्रुतिश्या
मितगंडलेखाःक्रामंतिविक्रांतनराधिरूढाः सहिष्णवोनेहयुधामभिज्ञा
नागानगोच्छ्रायमिवाक्षिपंतः २ विचित्रयाचित्रयतेवभिन्नांरुचंरवेः ८६
केतनरत्नभासा महारथौघेननसन्निरुद्धापयोदमंद्रध्वनिनाधरित्री
३ समुल्लसत्प्रासमहोर्मिमालमभिस्फुरच्चामरफेनपंक्ति

विभिन्नमर्यादमिहातनोतिनाश्वीयमाशाजलधेरिवांभः ४ हताहतेत्यु
द्धतभीमघोषैः समुज्झितायोधिभिरभ्यमित्रं नहेतयःप्राप्ततडित्विषःखेवि
वस्वदंशुज्वलिताःपतंति ५ अभ्यायतःसंततधूमधूम्रंव्यापिप्रभाजालमि
वांतकस्य रजःप्रतूर्णाश्वरथांगनुन्नंतनोतिनव्योमनिमातरिश्वा ६
भूरेणुनारासभधूसरेणतिरोहितेवर्त्मनिलोचनानां नास्त्यत्रतेजस्विभि
रुत्सुकानामह्निप्रदोषःसुरसुंदरीणां ७ रथांगसंक्रीडितमश्वहेषाबृंहंति
मत्तद्विपबृंहितानि संघर्षयोगादिवमूर्छितानिनादंनगृह्णंतिनदुंदुभीनां ॥
८ अस्मिन्यशःपौरुषलोलुपानामरातिभिःप्रत्युरसंक्षतानां मूर्छां

तरायंमुहुराक्षिपन्नितांतसारशीतंकरिपुष्कराग्रैः ९ असक्तदीनामुपनीय
मानैर्विष्टंभयद्भिःपदवीध्वजिन्याः उच्छ्रायमायांतिनरोपितैर्विपक्षैरिवा
स्यानघनैस्तटानि १० परिक्षतवक्षसिदंतिदंतैःप्रियांकशीतानभसःपतंती
नेहस्रमोहंप्रियसाहसानांमंदारमालाविरलीकरोति ११ निषादिसन्नाह
मणिप्रभौघेपरीयमाणेकरसीकरेण अर्कत्विषोन्मीलनमभ्युदेतिनखंडमा
खंडलकार्मुकस्य १२ महीभृतापक्षवतेवभिन्नाविगाह्यमध्यंपरवारणेन
नावर्तमानानिनदंतिभीममपांनिधेरापइवध्वजिन्यः १३ महारथानां
प्रतिदंत्यनीकमधिस्यदस्यंदनमुक्षितानां आमूललूनैरिहमन्युनेवमा

तंगहस्तैर्व्रियतेनपंथाः १४ धृतोत्पलापीडइवप्रियायाःशिरोरुहाणांशिथि
लःकलापः नवर्हभारःपतितस्यशंकोर्निषादिवक्षस्थलमातनोति १५ उरस
लकसहारइवांतकस्यस्रस्तसंख्यमदृश्यतेजस्विषुजीवितानि लोकत्रयास्वाद
नलोलजिह्वंनव्याददात्याननमत्रमृत्युः १६ इयंचदुर्वारमहारथानामाक्षि
प्यवीर्यंमहतांबलानां शक्तिर्ममावस्यतिहीनयुद्धेसौरीवताराधिपथाः
म्नदीप्तिः १७ मायाविवेषामतिविभ्रमोवाध्वस्तंनुमेवीर्यमुताहमन्यः गां
डीवमुक्ताहियथापुरामेपराक्रमंतेनतथाकरोति १८ पुंसःपदंमध्यममुत्तम
स्याद्वयंस्कुर्वन्धनुषःप्रणादैः ननंतथानैषमयास्यवेषःप्रच्छन्नमप्याहृयतेहि

कि०१६ वेष्टा १९ धनुःप्रबंधध्वनितंरुषेवसकृद्विकृष्टावितलेवमौर्वी संधानमु
८८ त्कर्षमिवव्युदस्यमुष्टेरसंभेदइवापवर्गे २० असाववष्टंभनतोसमाधिःशि
रोधरायारहितप्रयासः धृताविकारांस्त्यजतामुखेनप्रसादलक्ष्मीःशश
लांछनस्य २१ प्रहीयतेकार्यवशागतेषुस्थानेषुविष्टब्धतयानदेहः स्थि
रप्रयातेषुससौष्ठवश्चलक्ष्येषुपातःसदृशःशराणां २२ परस्यभूयान्विव
रेभियोगःप्रसह्यसंरक्षणमात्मरंध्रे भीष्मेप्यसंभाव्यमिदंगुरौवानसंभवत्ये ८८
ववनेचरेषु २३ कुलकं अप्राकृतस्याहवदुर्मदस्यनिवार्यमस्यास्त्रबलेन
वीर्यं अल्पीयसोप्यामयतुल्यवृत्तेर्महापकारस्यरिपोर्विवृद्धिः २४

ससंप्रधार्यैवमहार्यसारःसारंविनेष्यन्सबलस्यशत्रोः प्रस्वापनास्त्रंद्रुतमाज
हारध्वांतंघनानद्धइवाद्धिरात्रः २५ प्रसक्तदावानलधूमधूम्रासंरुंधतीधामस
हस्ररश्मेः महावनानीचमहातमिस्रच्छायाततानेशबलानिकाली २६
आसादितातत्प्रथमंप्रसह्यप्रगल्भतायाःपदवीहरंती सभेवभीमाविदधे
गणानांनिद्रानिरासंप्रतिभागुणस्य २७ गुरुस्थिराण्युत्तमवंशजत्वाद्वि
ज्ञातसाराण्यनुशीलनेन केचित्समाश्रित्यगुणान्ततानिसुहृत्कुलानी
वधनंषितस्थुः २८ कृतांतदुर्वृत्तइवापरेषांपुरःप्रतिद्वंद्विनिपांडवास्त्रे
अतर्कितंपाणितलान्निपेतुःक्रियाफलानीवतदायुधानि २९ असंस्थ

कि॰ स॰ १६ लैः कैश्चिदभिन्नवीर्यैः स्कंधेषु संश्लेषवतां तरूणां। मदेनमीलन्नयनाः सली
८४ लंनागाइवस्रस्तकरानिषेदुः ३० तिरोहितेंदोरथशंभुमूर्द्धः प्रणम्य
मानंतपसांनिरासैः सुमेरुवप्रादिवबिंबमार्कं पिशंगमुच्चैः स्फुरदियायते
जः ३१ छायांविनिर्धूयतमोमयींतांतत्वस्यसंवित्तिरिवापविद्यां
ययौविकाशंद्युतिरिंदुमौलेरालोकमभ्यादिशतीगणेभ्यः ३२ त्विषांप
ततिः पाटलितांबुवाहासा सर्वतः पर्वरीवसंध्या। निनायतपांडुतमुल्लसंती ८३
विनिद्रतांलोचनपंकजानि ३३ पृथग्विधान्यस्त्रविरामबुद्धाः शास्त्राणि
भूपः प्रतिपेदिरेते मुक्ताविताने नवलाहकानां ज्योतींषिरम्याइवदिग्वि

नागाः ३४ द्यौरुन्ननामेवदिशः प्रसेदुः स्फुटंविसस्रेसवितुर्मयूखैः
क्षयंगतायामिवयामवत्यांपुनः समीयायदिनंदिनश्रीः ३५ महास्त्रदु
र्गेशिथिलप्रयत्नंदिग्वारणेनेवपरेणरुग्णे। भुजंगमास्त्रंभुजवीर्यशाली
निवर्धनायप्रजिघायजिष्णुः ३६ जिह्वाशतान्युल्लसयंत्यजस्रंलसत्त
डिल्लोलविषानलानि त्रासान्निरस्ताभुजगेंद्रसेनानभश्चरैस्तत्पदवीवि
वव्रे ३७ दिग्नागहस्ताकृतिमुद्वहद्भिर्भोगैः प्रशस्तासितरत्ननीलैः
रराजसर्पावलिरुल्लसंतीतरंगमालेवनभोर्णवस्य ३८ निश्वासधूमैः स्थ
गितांशुजालैः फणावतामुत्फणमंडलानां। गच्छन्निवास्तंवपुरभ्युवाह

किरा१६
९०

विलोचनानांसुखमुत्तरश्मिभिः ३९ प्रतप्तचामीकरभासुरेणदिशःप्रका
शेनपिशंगयंत्यः निश्चक्रमुःप्राणहरेक्षणानांज्वालामहोल्काइवलोचने
भ्यः ४० आक्षिप्तसंपातमपेतशोभमुद्वह्निधूमाकुलदिग्विभागं वृ
तंनभोभोगिकुलैरवस्थांपरोपरुद्धस्यपुरस्यभेजे ४१ तमाशुचक्षुः
श्रवसांसमूहंमन्त्रेणतार्क्ष्योदयकारणेन नेतानयेनेवपरोपजापान
वारयामासपञ्जुःपतीनां ४२ प्रतिघ्नतीभिःक्षणमीक्षितानिद्युलोक
भाजामपिलोचनानि गरुत्मतांसंहतिभिर्विहायःक्षणप्रकाशाभिरि
वावितेने ४३ ततःसुपर्णव्रजपक्षजन्मानानागतिर्मंडलयन्जवेन जे ९०

रक्षणानीयवविवयान्ततनायवनस्पतीनांगहनानिवायुः ४४ युग्मं
मनःशिलाभंगनिभेनपश्चान्निरुध्यमानंनिकरेणभासां व्यूढैरुराभि
श्चनिपीड्यमानंनभःससर्पेवपुरःखगानां ४५ दरीमुखैरासवराग
ताम्रंविकासिरुक्मच्छदधामपीतं जवानिलाघूर्णितसानुजालो
हिमाचलःक्षीबइवाचकंपे ४६ समुन्नमन्नंबुदसंघदीर्घैर्नभस्तलं
जातपिशंगयद्भिः अंतर्हितार्कःपरितःपतद्भिश्छायाःसमाचिक्षिपिरेव
नानां ४७ सभोगिसंघःशममभ्युपैयाद्भासैन्यमन्यैर्विनतासुता
नां महाध्वरेविध्यपचारदोषःकर्मान्तरेणेवमहोदयेन ४८ साफ

किअं स्यमस्त्रे रिपुपौरुषस्य कृत्तागते भाग्य इवापवर्गे अनिंधनस्य प्रसभं स
९२ मन्युः समाददेस्त्रं ज्वलनस्य जिष्णुः ४९ ऊर्ध्वं तिरश्चीनमधश्च कीर्णैर्ज्वा
लासटैर्लंघितमेघपंक्तिः आयस्तसिंहाकृतिरुत्पपात प्राण्यंतमिछन्निव
जातवेदाः ५० भित्त्वेव भाभिः सवितुर्मयूखान्जज्वाल विष्वग्विसरत
स्फुलिंगः विशीर्यमाणाश्मनिनादधीरं ध्वनिं वितन्वन्नकृशः कृशानुः
५१ चामीकराद्रीनिव तुंगशृंगान्कृत्स्नपुराणीव हिरण्मयानि महावना
नीव च किंशुकानि ततान वह्निः पवनानुवृत्त्या ५२ मुहुश्चलत्पल्लवलोहि ९२
नीभिरुच्चैः शिखाभिः शिखिनावलीढाः तलेषु मुक्ताविशदा बभूवुः स्नि

ग्धांजनश्यामरुचः पयोदाः ५३ लिलिक्षतीव क्षयकालरौद्रे लोकं विलो
लार्चिषि रोहिताश्वे पिनाकिनाहूतमहांबुवाहमस्त्रं पुनः पाशभृतः प्र
णिन्ये ५४ ततो धरित्रीधरतुल्यरोधसस्तडिल्लतालिंगितनीलमूर्तयः
अधोमुखाकाशसरिन्निपातिनीरपः प्रसक्तं मुमुचुः पयोमुचः ५५ पराह
तप्रौढशिखाशिखावतो वपुष्यधिक्षिप्तसमृद्धतेजसि कृतास्पदास्तप्त
इवायसि ध्वनिं पयोनिपाताः प्रथमे वितेनिरे ५६ महानिलेछिन्नसिता
भ्रपातिभिः समेत्य सद्यः क्वथनेन फेनतां व्रजद्भिरार्द्रेंधनवत्परिक्षयं ज
लैर्वितेने दिवि धूमसंततिः ५७ स्वकेतुभिः पांडुविनीलपाटलैः समागताः

कि॰१६ शक्रधनुःप्रभाभिदः असंस्थितामादधिरेविभावसोर्विचित्रचीनांशुकचार
९२ तांत्विषः ५८ जलौघसंमूर्छनमूर्छितस्वनःप्रसक्तविद्युल्लसितैधितद्युतिः
प्रशांतिमेष्यन्धृतधूममंडलोबभूवभूयानिवतत्रपावकः ५९ प्रवृद्ध सिंधू
र्मिचयस्थवीयसांचयैर्विभिन्नाःपयसांप्रपेदिरे उपात्तसंध्यारुचिभिः
सरूपतांपयोदविच्छेदलवैःकृशानवः ६० उपैत्यनंतद्युतिरप्यसंशयंविभि
न्नमूलोनुदयायसंक्षयं तथाहितोयौघविभिन्नसंहतिःसहव्यवाहःप्रययौ ९२
पराभवं ६१ अथविहितविधेयैराशुमुक्तावितानैरसितनगनितंबश्याम
भासांघनानां विकसदमलधाम्नांप्रापनीलोत्पलानांश्रियमधिकविशुद्धां
१० पित्र

वह्निदाहादिवद्यौः ६२ इतिविविधमुदासेसव्यसाचीयदस्त्रंबहुसमरन
यतःसादयिष्यन्नरातिं विधिरिवविपरीतःपौरुषंन्यायवृत्तेःसपदितदुपनि
न्येरिक्ततांनीलकंठः ६३ वीतप्रभावतनुरप्यतनुप्रभावःप्रत्याचकांक्षज
यिनींभुजवीर्यलक्ष्मीं। अस्त्रेषुभूतपतिनापहृतेषुजिष्णुर्वर्षिष्यतादिनकृते
दिने× वजलैपुलोकः ६४ छ इतिश्रीकिरातार्जुनीयेमहाकाव्येलक्ष्म्यंकेभा
रविकृतौअस्त्रयुद्धोनामषोडशःसर्गः ॥ अथापदामुद्धरणक्षमेषु
मित्रेष्विवास्त्रेषुतिरोहितेषु धृतिंगुरुश्रीर्गुरुणाभिपुष्यन्स्वपौरुषेणेवशरा
सनेन १ भूरिप्रभावेणरणाभियोगात्प्रीतोविजिह्मस्यतदीयवृद्ध्या

कि०स०१७ स्पष्टोप्यविस्पष्टवपुःप्रकारः सर्पन्महाधूमइवाद्रिदाहात् २ तेजःसमाश्रित्य
परैरहार्यं निजंमहान्मित्रइवोरुधैर्यं आसादयन्नस्खलितस्वभावं भीमेभुजा
९३ लंबमिवारिदुर्गे ३ वंशोचितत्वादभिमानवत्यासंप्राप्तयासंप्रियतामसु
भ्यः समक्षमादित्सितयापरेणवध्वेवकीर्त्यापरितप्यमानः ४ पतिंन
गानामिवबद्धमूलमुन्मूलयिष्यंस्तरसाविपक्षं लघुप्रयत्नंनिगृहीतवीर्यस्त्रि
मार्गगावेगइवेश्वरेण ५ संस्कारयुक्त्यारमयत्सुचेतःप्रयोगशिक्षागु ९३
णभूषणेषु जयंयथार्थेषुशरेषुपार्थःशब्देषुभावार्थमिवाशशंसे ६
कुलकं भूयःसमाधानविवृद्धतेजानैवंपुरायुद्धमितिव्यथावान् सनिर्व

वामाक्षिमहःप्रपन्नंविषंमहानागमिवेक्षणाभ्यां ७ तस्याहवायासविलो
लमौलेःसंरम्भताम्रायतलोचनस्य निर्वापयिष्यन्निवरोषतप्तंप्रस्नापयामा
समुखंनिदाघः ८ क्रोधांधकारांतरितोरणायभ्रूभंगलेखाःसबभारति
स्रः घनोपरुद्धःप्रभवायवृष्टेरूर्ध्वांशुराजीरिवघर्मरश्मिः ९ सध्वानय
न्नंबुदनादिचापंहस्तेनदिग्नागइवाद्रिशृंगं बलानिशंभोरिषुभिस्तता
पचेतांसिचिंताभिरिवाशरीरः १० सद्वादितेवाभिनिविष्टबुद्धौगुणाभ्य
सूयेवविपक्षपाते अगोचरेवागिवचोपरेमेशक्तिःशराणांशितिकंठकाये
११ उमापतिंपांडुसुतप्रणुन्नाःशिलीमुखानव्यथयांबभूवुः अभ्यु

कि१७ स्थितस्याद्रिपतेर्नितंबमर्कस्यपादाइवहैमनस्य १२ संप्रीयमाणोनुबभूव
९८ तीव्रंपराक्रमंतस्यपतिर्गणानां विषाणभेदंहिमवानसह्यंवप्रानतस्येवसुर
द्विपस्य १३ तस्मैहिभारोद्धरणेसमर्थंप्रदास्यताबाहुमिवप्रतापं चिरोढ
महेभिभवस्तदानींसकारणानामपिकारणार्हैन १४ सत्याहतौजाःक्षत
सत्ववेगःपराक्रमंज्यायसियस्तनोति तेजांसिमानोरिवनिःपतंतीयशां ९८
सिवीर्यज्वलितानितस्य १५ दृष्टावदानाद्व्यथतेरिलोकःप्रध्वंसमेतिच्य
युताबतेजः तेजोविहीनंविजहातिदर्पःशांतार्चिषंदीपमिवप्रकाशः १६
ततःप्रयात्यस्तमदावलेपःसंजय्यतायाःपदवींजिगीषोः गंधेनजेतुःप्रमु

खागतस्यगंधद्विपस्येवमतंगजौघः १७ एवंप्रतिद्वंद्विषुतस्यकीर्तिंमौलिं
दुलेखाविशदांविधास्यन् इयेषपर्यायजयावसादेरणक्रियांशंभुरनु
क्रमेण १८ विशेषकं मुनेर्विचित्रैरिषुभिःसभूयान्निन्यवशंभूतपतेर्बलौ
घः सहात्मलाभेनसमुत्पतद्भिर्जातिस्वभावैरिवजीवलोकः १९ वितन्वतः
स्तस्यशरांधकारंत्रस्तानिसैन्यानिरवंनिशामुः प्रवर्षतःसंततवेपथूनि
क्षपाघनस्येवगवांकुलानि २० ससायकान्साध्वसविप्लुतानांक्षिपन्परेषा
मतिसाधनेन शशीवदोषावृतलोचनानांविभिद्यमानःपृथगाबभासे २१
सोभिसमणतनायगणाधिपानांभेदंययावाकृतिरीश्वरस्य तरंगकंपेन

किस १५ महाह्रदानां छायामयस्येव दिनस्य भर्तुः २२ प्रसेदिवांसं न तमाप कोपः कु
५५ तः परस्मिन्पुरुषे रजो वा आकारवैषम्यमिदं च भेजे दुर्लक्ष्यचिह्ना महतां हि वृ
त्तिः २३ विस्फार्यमाणस्य ततो भुजाभ्यां भूतानि भर्त्तुर्धनुरंतकस्य भिन्ना
कृतिं ज्यां ददृशुः स्फुरंतीं क्रुद्धस्य जिह्वामिव तक्षकस्य २४ सव्यापसव्यध्व
नितोग्रचापं पार्थः किराताधिपमाशशंके वैषम्यसंपादितकर्णतालं यंता
गजं व्यालमिवापराद्धः २५ निजघ्निरे तस्य हरेषुजालैः पतंति वृंदानि शिली
मुखानां ओजस्विभिः सिंधुमुखागतानि यादांसि यादोभिरिवार्णवस्य ५५
२६ विभेदमंतः पदवीनिरोधं विध्वंसनं वा विदितप्रयोगः नेतारिलोके

षु करोति यद्यत्तत्तच्चकारास्य शरेषु शंभुः २७ सोऽपवर्गीतप्रथमायुधस्य
क्रोधोज्झितैर्वेगितया पतद्भिः छिन्नैरपि त्रासितवाहिनीकैः पेते कृतार्थै ८८
रिव तस्य बाणैः २८ अलंकृतानामृजुतागुणेन गुरूपदिष्टां गतिमास्थि
तानां सतामिवापर्वणि मार्गणानां भंगः जिह्मोध्वनिमुन्ममाथ
२९ बाणच्छिदस्ते विशिखाः पुरारेरवाङ्मुखीभूतफलाः पतंतः अ
खंडितं पांडवसायकेभ्यः कृतस्य सद्यः प्रतिकारमीयुः ३० निवार्यमाण
नतिलाघवेन प्रमाथिनस्तान् शिवमार्गणानां शंकाकुलायानिचरवा
ननक्षं दूरं बाणान्ध्वजिन्या हृदयेषु जिह्नुः ३१ तस्यातियत्नादतिरि

कि॰१७ क्षमाणेपराक्रमेन्योन्यविशेषणेन हंतापुरांभूरिचपक्षवर्षंनिरासनैदाघ
५६ इवांबुमेघः ३२ अनास्थयांतःक्वचिदेवमर्मप्रियैषिणानुप्रहिताःशिवेन
सुहृत्प्रयुक्ताइवनर्मवादाःशरामुनेःप्रीतिकराबभूवुः ३३ अस्त्रैःसमाना
मतिरेकिणींवापश्यन्निषूणामथतस्यशक्तिं विषादवक्तव्यबलःप्रमा
थीस्वमाललंबेबलमिंदुमौलिः ३४ ततस्तपोवीर्यसमुद्धतस्यपारंयिया
सोःसमरार्णवस्य महेषुजालान्यखिलानिजिष्णोरर्कैःपयांसीवसमाच ५६
चाम ३५ रिक्तेसविस्रंभमथार्जुनस्यनिषंगवक्त्रेनिपपातपाणिः अ
न्यद्विपापीतजलेसतर्षंमतंगजस्येवनगाश्मरंध्रे ३६ च्युतेसतिस्मि

न्निषुधौशरार्थीतद्ध्वस्तार्थसारेसहसैवबंधौ तत्कालमोघप्रणयःप्रपे
देनिर्वाच्यतांकामइवाभिमुख्ये ३७ संघट्टयामासगतागताभ्यांसवेग
मग्रांगुलिरस्यतूणौ विधेयमार्गेमतिरुन्मुखस्यनयप्रयोगाविवगांजि
गीषोः ३८ बभारशून्याकृतिरर्जुनस्तौम हेषुधीवीतमहेषुजालौ युगां
तसंशुष्कजलौविजिघ्नःपूर्वापरौलोकइवांबुराशी ३९ तेनानिभिन्नेनत
थानपार्थस्तयायथारिक्ततयानुतेपे स्वमापदंप्रोज्झ्यविपत्तिमग्नंशोचं
तिसंतोह्युपकारिपक्षं ४० प्रतिक्रियायैविधुरःसतस्मात्कृच्छ्रेणविश्लेष
मियायहस्तः पराङ्मुखत्वेपिकृतोपकारात्तूणीमुखान्मित्रकुलादिवा

किरा०१७ यः ५१ पत्राक्रियापात्रणमुखस्य भर्तुर्जलेनतदानीमुपकारिणीव संभाव
५८ नायां विफलीकृतायां पत्युः पुरः साहसमासितव्यं ५२ ततोंभुराक्षिप्तमहे
षुजालं लौहैः शरैर्मर्मसु निस्तुतोद हूनोत्तरं तत्त्वविचारणायां वादीव दोषै
र्गुरुभिर्विपक्षं ५३ जहारचास्मादचिरेण वर्म ज्वलन्मणिद्योतितहैमलेखं
चंडः पतंगान्मरुदेकनीलं तडित्वतः खंडमिवांबुदस्य ५४ विकोशनिर्धौ
ततनोर्महासेः फणावतश्च त्वचि विच्युतायां प्रतिद्विपाबद्धरुषः समक्षं नाग ५८
स्य चाक्षिप्तमुखच्छदस्य ५५ विबोधितस्य ध्वनिना घनानां हरेरपेतस्य
चशैलरंध्रात् निरस्तधूमस्य च रात्रिवह्नेर्विनातनुत्रेण रुचं स लेभे ५६

युग्म आविक्ततायामपि नाम युक्तामनुद्धतां प्राप्य तदीयकृच्छ्रे महीगतौ ताव
पृथीतदानीं विववतुः स्वेतनयेव योगं ५७ स्थितं विशुद्धे नभसीव सत्वे धाम्ना
तपोवीर्यमयेन युक्तं शस्त्राभिघातैस्तमजस्रमीशं त्वष्टा विवस्वंतमिवोल्लि
लेख ५८ संरंभवेगोज्झितवेदनेषु गात्रेषु बाधिर्यमुपागतेषु बभूवतस्या
गणितांहितेषोर्लौहैस्तिरस्कारइवात्ममन्युः ५९ ततोनिपूर्णायतहेमबाहुः
श्रीमान्सरत्नोहितदिग्धदेहः आस्कंद्यवेगेन विमुक्तनादः क्षितिं विधुन्वन्नि
वपार्श्वदेशैः ७० साम्यं गतेनाशनिना मघोनः शशांकलेखाकलितपांडुरे
ण शंभुं विभज्य धनुषा जघानस्तंभं विषाणेन महानिवेभः ६१ युग्मं

कि॰१७ रयेणसासन्निदधेपतंती भवोद्भवेनावनिमात्तवाप्यधि: समुद्धतासिंधुरने
५८ कमार्गापरेरुद्धितनोजसिसिजगकुलेव ५२ विकार्मुक: कर्मसुशोचनीय: पर:
च्युतौदार्यइवोपचार: विचिक्षिपेशलभृतासलीलंसपत्रिणिद्दूरमदूरपातै:
५३ उपोढकल्याणफलोभिरक्षन्वीरव्रतंपुण्यरणाश्रमस्थ: जपोपवासैरि
वसंयतात्मातेपेमुनिस्तैरिषुभि:शिवस्य ५४ ततोयभूमिंव्यवसायसि
द्धे:सीमानमन्यैरतिदुस्तरंस: तेज:श्रियामाश्रयमुत्तमासिंसाक्षादहंकार ५८
मिवाललंबे ५५ ददानवद्यन्ननवद्यकर्मा वचारचित्रंप्रतिचारमार्गै: हृ
त्नेननिस्त्रिंशभृतासदीप्त:साकंकिरातेनचारिधिकर्मिणेव ५६ यथानिज

वर्त्मनि मातिभाभि: छायामयस्वापकसहस्ररश्मि: तथाश्वमन्नार्जुनग
स्फलीषुसाष्टं द्धिमतिर्द्धहशेसभर्ते: ५७ सरुद्धदेशादपवर्जितांग:शिवप्रणु
न्नेनशिलीमुखेन ज्वलन्नसिस्तस्यपपातपाणेर्घनस्यवप्रादिववैद्युतो
ग्नि: ५८ आक्षिप्तचापावरणेषुजालैश्छिन्नोत्तमासि:समवेक्ष्यशत्रु: रि
क्त:प्रकाशश्चवत्तत्वमसत्साधितोद्यानेइवप्रदेश: ५९ सखंडनंप्राप्यप
रादमर्षवान्भुजद्वितीयोपिविजेतुमिच्छया ससर्जवृष्टिंपरिरुग्णपादपाज
वेनमेघ:पयसामिवाश्मनां ६० नीरंध्रे:परिगमितेक्षयंपृषत्कैर्भूताना
मधिपतिनाशिलावितानैरुच्छ्रायस्थगितनभोदिगंतरालं विक्षेपक्षि

२२

किरा१७
९९

तिरुहज्जालमिंद्रसूनुः ६१ निःशेषंशकलितवल्कलांगसारैःकुर्वद्भिर्भु
वमभितःकषायचित्रां ईरीणःसकुसुमपल्लवैर्नगेंद्रैरातेनबलिभिवरंग
देवताभ्यः ६२ उन्मज्जन्मकरइवामरापगायावेगेनप्रतिमुखमेत्यबा
णनद्याः गांडीवीकनकशिलानिभंभुजाभ्यामाजघ्नेविषमविलोचनस्य
वक्षः ६३ अभिलषतउपायंविक्रमंकीर्तिलक्ष्म्योरसुगममरिसैन्यैरंक
मभ्यागतस्य जनकइवशिशुत्वेसुप्रियस्यैकसूनोरविनयमपिसेहेपांड ९९
वस्यस्मरारिः ६४ ॥ इतिश्रीकिरातार्जुनीयेमहाकाव्येलक्ष्मंकेभा
रविकृतौनारास्त्रसंहारनामसप्तदशःसर्गः ॥ श्रीः रामनाम श्रीः

ततउदग्रइवद्विरदेमुनौरणमुपेयुषिभीमभुजायुधे धनुरपास्यसबाणधिशं
करःप्रतिजघानघनैरिवमुष्टिभिः १ हरपृथासुतयोर्ध्वनिरुत्पतन्नमृदुसं
चलितांगुलिपाणिजः स्फुटदनल्पशिलारवदारुणःप्रतिनिनाददरीषुमहीभृ
तः २ शिवभुजाहतिभिन्नपृथुक्षतीःसुखमिवानुबभूवकपिध्वजः कइवना
मबृहन्मनसांभवेदनुकृतेरपिसत्त्ववतांक्षमः ३ व्रणमुखच्युतशोणितसी
करस्थगितशैलतटाश्मभुजांतरः अभिनवौषसरागभृतावभौजलधरेण
समानमुमापतिः ४ उरसिशूलभृतःप्रहितामुहुःप्रतिहतिंययुरर्जुनमुष्टयः
भृशरयाइवसह्यमहीभृतःपृथुनिरोधसिसिंधुमहोर्मयः ५ निपततेपि

शिरोधरमायतेसममरत्नियुगेयुगवद्भुजः त्रिचतुरेषुपदेषुकिरीटिनाकुलि
तदहिमदादिवनस्वले ६ अभिभवोद्धितमन्युविदीपितः समभिसृत्य
भृशंजवमोजसा करयुगेनवियुज्यसमाददेशशिकलाभरणस्यभुजद्वयं
७ प्रववृतेथमहाहवमल्लयोरचलसंचलनाहरणोरणः करणशृंखलसंक
लनागुरुर्गुरुभुजायुधगर्वितयोस्तयोः ८ अयमसौभगवानुतपाण्डवः स्थि
तमवाङ्मुनिनाशशिमौलिना समधिरूढमजेननुजिष्णुनास्विदितिवे १००
गवशान्मुमुहेगणैः ९ प्रचलितेचलितंस्थितमास्थितेविनमनेनतमुन्न
तमुन्नतौ वृषकपिध्वजयोरसहिष्णुनामुहुरभाविभयादिवभूभृता १

करणशृंखलनिःसृतयोस्तयोःकृतभुजध्वनिवल्गुविवल्गितैः चरणपात
निपातितरोधसःप्रसस्रुःपरितःसरितस्थलीः ११ वियतिवेगपरिप्लुतम
तरासमभिसृत्यरयेणकपिध्वजः चरणयोश्चरणानमितक्षितिर्निजगृहे
तिसृणांजयिनंपुरां १२ विस्मितःसपदितेनकर्मणाकर्मणांक्षयकरःपरः
पुमान् क्षेप्तुकाममवनौतमक्षमंनिष्पिपेषपरिरभ्यवक्षसा १३ तपसात
थानमुदमस्ययथौभगवान्यथाविपुलसत्वतया गुणसंहतेःसमभि
रिक्तमहोनिजमेवसत्वमुपकारिसतां १४ अथहिमशुचिभस्मभूषितंशि
रसिविकाशितमिंदुलेखया स्ववपुरतिमनोहरंहरंधेरितमुदीरयनेनाम

कि १८
१०१

पांडवः १५ सहशरधिंनतथानिजंकार्मुकंवपुरतनुतथैवसंवर्मितं निहि
तमपितथैवपश्यन्नसिंहरिहयतनयोययौविस्मयं १६ सिषिचुरवनिमं
बुवाहाःशनैःसुरकुसुममियायचित्रंदिवः विमलरुचिभृशंनभोदुंदुभेर्ध्व
निरखिलमनाहतस्यानशे १७ आसेदुषांगोत्रभिदानुवृत्त्यागोपाय
कानांभुवनत्रयस्य रोचिष्णुरत्नावलिभिर्विमानैर्द्यौराचितातारकितेव
रेजे १८ हंसाबृहंतःसुरसद्मवाहाःसंह्रादिकंठाभरणाःपतंतः च १०१
क्रुःप्रयत्नेनविकीर्यमाणैर्व्योम्नःपरिष्वंगमिवात्मपक्षैः १९ मुदित
मधुलिहोवितानाकृतीःस्रजउपरिवितत्यसांतानिकीः जलदर

वनिषदिवांसद्वेषमरुदुपसुखयांबभूवेश्वरं २० कृतधृतिपरिवंदितेनो
च्चकैर्गणपतिभिरभिन्नरोमोद्गमैः तपसिकृतफलेफलज्यायसीस्तुति
रितिजगदेहरेःसूनुना २१ शरणंभवंतमतिकारुणिकंभवभक्तिगम्य
मधिगम्यजनाः जितमृत्यवोजितभवंतिभयेससुरासुरस्यजगतःश
रणं २२ विपदेतितावदवसादकरीनचकामसंपदभिकामयते ननमं
तिनैकपुरुषंपुरुषास्तवयावदीशननतिःक्रियते २३ संसेवंतेदानशी
लाविमुक्त्यैसंपश्यंतोजन्मदुःखंपुमांसः निःसंगत्वंयत्फलस्यानते
भ्यस्तत्कारुण्यंकेवलंनस्वकार्यं २४ प्राप्यतेयदिहदूरमगत्वायत्फ

कि१८ १०२ लत्यमरलोकगताय। तीर्थमस्तिन भवार्णवबाह्यं सार्वकालिकमते
भवतस्तत् २५ अजनितेनु विपदं त्वयि प्रीतिमान्प्रतिरतमतिरेनिघोरांग
तिं इयमनघनिमित्तशक्तिः परातवबरदनचित्तभेदः क्षीवत २६ दृक्षि
णां जगत्दृक्षिणमूर्तितत्वतः शमकरीमविदित्वा रागिणापिविहिता
तव भक्त्या संस्मृतिर्भव भवत्यभवाय २७ दृष्ट्रादृश्यान्याचरणीयो
निविधायप्रेक्षाकारीयातिपदं मुक्तमुपायैः सम्यग्दृष्टिस्तस्यपरंपरया १०२
तियस्त्वायस्त्वापाते साधुविधेयं सविधत्ते २८ मुक्तः स्वशक्त्यानुनयः
प्रजानां हितोपदेशैरुपकारयंतः समुच्छिनत्सित्वमचिंत्यधामाकर्मा

ण्युपेतस्यदुरुत्तराणि २९ सन्निबद्धमपकर्त्तुमहार्यं भूरिदुर्गतिभयं
भुवनानां अद्भुताकृतिमयीमतिमायस्त्वं बिभर्षिकरुणामयमायां॥
३० नरागिचेतः परमाविलासितावधूः शरीरेनचनास्तिमन्मथः न
मस्क्रियाचाषसि धातुरन्यत्तेनिसर्गदुर्बोधमिदं तव हितं ३१ नवाव
रीयंकरिवर्मसांगजज्वलन्मणिः सारसनमहनाहिः स्रग्गास्यपंक्तिः
श्व भस्म चंदनकलाः रमांशोक्तमममंचकास्ति ३२ अविग्रहस्याप्य
तुलनहेतुनासमेत्य भिन्नद्वयमूर्तितिष्ठतः नचैवनान्यास्यजगत्
विद्यते विरुद्धवेषाभरणस्यकांतता ३३ आत्मलाभपरिणामनिरो

कि१८ जैर्भूतसंघइवनत्वमुपेतः तेनसर्वभुवनातिगलोकेनोपमानमसिनापु
१०२ पमेयः ३४ त्वमतकस्थावरजंगमानांत्वयाजगत्प्राणितिर्देवविश्वं
त्वंयोगिनांहेतुफलेरुणत्सित्वंकारणंकारणकारणानां ३५ रक्षोभिः
सुरमनुजैर्दितेःसुतैर्वा यल्लोकेषु विफलमासमाधिपत्यं पार्वत्याःश नन५
रणगतार्तिहारणेतन्माहात्म्यंभवभवतीशिरस्त्रिपायाः ३६ नरस्ताभु
वनानियोविसर्गिध्वविलः नतिव्रस्नपतःपरंपवित्रं परितोदुरिता १०३
नियःपुनीतेशिवमस्मैपवनात्मनेनमस्ते ३७ भवतःस्मरतोसदास
नेजायिनिब्रह्ममयेनिषेदुषां दहतभवबीजसंहतिंशिखिनेनैकशि

खायतेनमः ३८ आबाधामरणभयार्चिषाविरायपुष्टेभ्यःशिव
महत्तांभवानकेन निर्वाणंसमुपगमेनजस्त्रिवतंतेयज्ञजीवनानांप्रभव
नमोस्तुजीवनाय ३९ यःसर्वेषामावरीतावरीयान्सर्वैर्भावैर्ना
वृतोनादिनिष्ठः मार्गातीतायेंद्रियाणांनमस्तेविज्ञेयायव्योमरूपा
यतस्मै ४० अणीयसेविश्वविधायिनेनमोनमोंतिकस्थायनमो
दवीयसे अतीत्यवाचांमनसांचगोचरंस्थितायतेतत्पतयेनमोन
मः ४१ असंविदानस्यममेशसंविदांतितिक्षतुंदुश्चरितंत्वमर्ह

कि १८ सि विरोध्यमोहात्पुनरभ्युपेयुषां गतिर्भवानेव दुरात्मनामपि ४२
१०४ आस्तिकशुद्धमवतः प्रियधर्मधर्मं धर्मात्मजस्य विहितागसि श
त्रुवर्गे संप्राप्नुयां विजयमीश यया समृद्ध्या तां भूतनाथ विभुतां वि
तराहवेषु ४३ इति निगदितवंतं सूनुमुच्चैर्मघोनः प्रणतशिरसमी
शः सादरं सांत्वयित्वा ज्वलदनलपरीतं रौद्रमस्त्रं दधानं धनुरुपपद १०४
मस्मै वेदमभ्यादिदेश ४४ स पिंगाक्षः श्रीमान्भुवनमहनीयेन मह
सा तनुं भीमां बिभ्रत्त्रिगुणपरिवारप्रहरणः परीत्येशानं त्रिः स्तुति

भिरुपगीतः सुरगणैरथो पांडोः सूनुं जलधिमिव भास्वानुपययौ
४५ अथ शशिधरमौलेरभ्यनुज्ञामवाप्य त्रिदशपतिपुरोगाः पूर्ण
कामाय तस्मै अवितथफलमाशीर्वादमारोपयंतो विजयि विविधम
स्त्रं लोकपाला वितेनुः ४६ असंहार्योत्साहं जयिनमुदयं प्राप्य तरसा धु
रं गुर्वीं सोढुं स्थितमनवसादाय जगतः स्वधाम्ना लोकानां तमुपरि कृतस्था
नममरास्तपालक्ष्म्यादीप्तं दिनकृतमिवोच्चैरुपजगुः ४७ श्रीः
ध इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके सकलविद्व
रेण्यपंडितमंडलाग्रगण्यपुंडरीकाक्षचरणसरोजभजनावाप्तसौज

कि॰१८ न्यामृतानंदीयमानाखिललोकभाराविष्कृतो कद्रप्रसादोनामाह्लादग्रास
१०५ ग्गीः संपूर्णतामगमत् श्रीशिवार्पणमस्तु करकृतमपराधं क्षंतुमर्हंति
संतः श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः
श्रीः जलेषुनेत्रपेशाकेसुपरिधाविसंवत्सरे शुचौ सितगुरौ हरिरजनि पूर्वया
मैलिखत् सदाशिवपदांबुजभ्रमरबालकृष्णः शुभं किरातममलार्थरामम १०५
खिलार्थदं सहृदः १